This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४४०

॥श्रीग काव्यप्रकाश

Acc- No :- ~~1228~~ M1356.
Title :- काव्यप्रकाश
Author :- मम्मट
Subject :- Rhetoric
पत्रे :- 38

KKSU LIBRARY RAMTEK 441 106 Dist. Nagpur M1356

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ॥ धातोरर्थे उत्कर्षः तेन च नमस्कारो व्यज्यते देवतापेक्षया सर्वेभ्य उत्कर्षं नमस्कारः तथा चस
र्वः प्रकारेण ग्रंथकृतो विस्रवंति पातित्वात् तां प्रत्यस्मि प्रणत इति व्यज्यते ॥ नियती त्य च व्यतिरेका
श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ ७० ॥ ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां
ग्रंथकृत् परामृशति॥ नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्रां॥ नवरस
रुचिरां निर्मितिमादधती भारती कवेर्जयति॥१॥ नियत्या शक्त्या नियतरूपा सुखदुःख
मोहस्वभावा॥ परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतंत्रा षड्रसान्वहृद्य एव
ते ब्रह्मणो निर्मितिर्निर्माणं॥ एतद्विलक्षणा तु कविवाङ्निर्मितिः अत एव जयति॥
जयत्यर्थेन च नमस्कार आक्षिप्यत इति॥ तां प्रत्यस्मि प्रणत इति लक्ष्यते॥ इहाभिधेयं
सप्रयोजनमाह॥ काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये॥ सद्यः परनिर्वृ
तये कांतासंमिततयोपदेशयुजे॥२॥ कालिदासादीनामिव यशः॥ श्रीहर्षादे
र्धावकादीनामिव धनं॥ राजादिगतोचिताचारपरिज्ञानं॥ आदित्यादेर्मयूरादी
नामिवानर्थनिवारणं॥ सकलप्रयोजनमौलिभूतं समनंतरमेव रसास्वादसमुद्भूतं
विगलितवेद्यांतरमानंदं॥ प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमि
विषमताश्च न्य १

काव्यांतर २

मयूरादिकवीनां आदित्याराधनेन कुष्ठाद्यनर्थनिवारणं जातं॥ प्रभुतुल्यशब्दप्रधानवेद
शास्त्रादिषु यथा प्रभुणा ... सर्वं क्रियते तथा वेदादिना पुरुषः क्रियते तथा सुहृ
तार्थतात्पर्यवत्पुराणादितिहासादिभ्यश्च शब्दार्थयोर्गुणभावेन रसांग
भूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकवि
कर्म तत्कांतेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न राव
णादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्व
था तत्र यतनीयं॥२॥ शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। का
व्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥३॥ शक्तिः कवित्वबीजरू
पः संस्कारविशेषः॥ यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्या
त्॥ लोकस्य स्थावरजंगमात्मकलोकवृत्तस्य शास्त्राणां छंदोव्याकरणा
भिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रंथानां का
व्यानां च महाकविसंबंधिनां॥ आदिग्रहणात् इतिहासादीनां च विमर्श
धर्मार्थकाममोक्षाः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

2

॥२॥ प्रथमारंभ कृतिकाम्यां विघ्नविघाताय कृतं नाशे प्रति नियो
नाद्भुतमस्ति॥ काव्यं कर्तुं विचारयितुं च ये जानंति तदुपदेशेन करणे योजने
च यो नः पुण्येन प्रवृत्तिः इति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे नि
र्माणे समुल्लासे च हेतुर्न हेतवः॥
अत्र व्याख्या॰ आनुपूर्व्या विशेष विशिष्टवाक्यस्वरूपो ग्रंथः तस्यारंभः प्र
थमा कृतिः आरंभ इति घं ग्रर्ष ग्रंथाव्यवहितपूर्वकालीनत्वे। चतुर्थी
र्थः प्रयोजनत्वं तथा च शास्त्रबोधकः कदपि हितोपायो द्रव्यवत् प्रकारेति ध
र्मिवत् प्रकाशात इत्यर्थः॥ तथाचारब्ध ग्रंथेप्याशा॰ आरब्ध ग्रंथाव्यवहितपूर्वका
लीन समुचितेष्टदेवताकर्मक परामर्शानुकूल कृतिमान् ग्रंथकृत॥ नियतिकृत
नियमः कमलादिसामग्रीत प्रहितो अत्रानिमित्तकारणता अन्यनेपरतंत्रामिव
परमाण्वाद्युपादान कर्मादि सहकारिकारणपरतंत्रा मत्र समवायिकारणाता त
द्रूपा॥ नवरसरुचिरा सारुचिराचेति विग्रहः ब्रह्मनिर्मितिस्तु षड्रसासती तेन हृद्या
कविनिर्मितिः [illegible] रुचिरा हृद्येत्यर्थः॥ रुचिरपदस्य हृद्यत्वद्योतनार्थं कर्म
धारय एवाश्रीयतामित्यर्थः॥

मेहोपकरणे अयं खलु नास्तीति साधितं तथा। तद्रूपा किं करणीय एवमेव वनवासरसस्यास्यामिप
षां प्रायशो योजनां व्यंजकत्वमपीष्यते। तत्र वाच्यस्य यथा। माँ एह्य [illegible] रो वज्जर पंजह रूपाथि
तिसाहि जनु मूए। ताभणा किं करणिज्जं एमेअ ग्गा वासरो ठाइ। अत्र स्वैरविहारार्थिनी ति व्य
ज्यते। लक्ष्यस्य यथा। साहंती सहि सुहअं खणे खणे दूमिआसि मज्झ कए। सब्भावणेह करणि
ज्जसरिसअं दाव विरइअं तुमए। अत्र मत्प्रियेरमयंत्या त्वया शत्रुत्वमाचरितमिति लक्ष्यते।
तेन च कामुकविषये सापराधत्वप्रकाशनं व्यंग्य। व्यंग्यस्य यथा। उअ णिच्चल णिप्पंदा बि
सनीपत्तमि रेहइ बलाआ। णिम्मल मरगअ भाअण परिट्ठिआ संखसुत्तिव्व। अत्र निश्च
दलं नाश्वस्तत्वं प्रतीयते। तेन च जनरहितत्वं। अतः संकेतस्थानमेतदिति कयाचि अनुन्य
ते। अथवा मिथ्यावदसि न त्वमत्रागतोऽभूरिति व्यज्यते। वाचकादीनां क्रमेण स्वरूपमाह॥
साक्षात्संकेतितं योर्थमभिधत्ते स वाचकः। इहागृहीतसंकेतस्य शब्दस्यार्थविशेषप्रतिपत्ते
रभावोत्संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यत्र यस्याव्यवधानेन संके
तो गृह्यते स तस्य वाचकः। संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा॥ यद्यप्यर्थक्रियाका
रितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव। तथाप्यानंत्याद्व्यभिचाराच्च तत्र संकेतः [illegible]
[illegible] कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां शब्दानां विषयविभाग।
संकेत [illegible] गुणकर्मजाति
साधयंती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते। सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया॥२.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुतनिश्च... निष्येद्या विशिनोपन्नेन जातबल्का ॥ निर्मल्कमरकतभाजन प्रतिबिंबितातारांखचतुर्कोण ।
फलकार मारभ्य विकृतिप कर्ते
नप्राप्नातीतिच तदुपाधावेवसंकेतः उपाधिश्च द्विविधः । वस्तुधर्मो वक्तृयदृच्छा... सन्निवे
शितश्च । वस्तुधर्मः सिद्धसाध्यश्च । सिद्धोपि द्विविधः । पदार्थस्य प्राणप्रदो विशेषाधानहेतु श्च । तत्राद्यो जातिः । उक्तं हि वाक्यपदीये गौः स्वरूपेण न गौः नाप्यगौः गोत्वाभिसंबंधा
त्तु गौरिति । द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरी
भूतावयवः क्रियारूपः । डित्थादिशब्दानामंत्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृ
च्छया डित्थादिष्वर्थेषु पाधि तया सन्निवेश्यत इति स संज्ञारूपो यदृच्छात्मक उपाधिरिति । गौः
शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः । परमाण्वादीनां
गुणमध्ये पातात् पारिभाषिकं गुणत्वं । गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्र
यभेदात् भेद इव लक्ष्यते । यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालंबनभेदात् । हिमपयः
शंखाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधा
न प्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यं ... गुडतंडुलादिपाकादिष्वप्येकमेव
पाकादित्वं । बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्य
र्थेषु डित्थत्वादिकमस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये । तद्वानपोह
इत्यन्ये । स्थापितं जनकत्वमत्र विनिमय सत्पान्ये यो वदान्ध्यय समवेत तत् प्राण । पकिंचित् समवेत तत्सं
चारी रे१

मुख्यार्थे ... भिधा रूपा मुख्या वृत्तिः २ लक्ष्यार्थं विना शक्यार्थेः तत्र वृत्तिः २ वाच्यैः
वाशब्दार्थ केश्चिदुक्त इति ग्रंथगौरवभयात्प्रकृतानुपयोगाच्च न प्रदर्शितो । स मुख्यार्थ
स्तत्र मुख्यो व्यापारोस्याभिधोच्यते । स इति साक्षात्संकेतितः । अस्येति शब्दस्य । मुख्यार्थ
बाधे तद्योगे रूढितोथ प्रयोजनात् । अन्योर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया । कर्म
णि कुशल इत्यादौ दर्भग्रहणाद्ययोगात् गंगायां घोष इत्यादौ च गंगादीनां घोषाद्यधिकरण
त्वासंभवात् मुख्यार्थे बाधे विवेचकत्वादौ सामीप्ये च संबंधे च रूढितः प्रसिद्धेः । तथा गंगायां
स्तट इत्यादेः प्रयोगाद्येषां न तथा प्रतीतिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः
प्रयोजनाच्च मुख्येनामुख्योर्थो लक्ष्यते यत्स आरोपितः शब्दव्यापारः सांतरार्थनिष्ठो लक्ष
णा । स्वसिद्ध्ये पराक्षेपः परार्थं स्वसमर्पणं । उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा । कुंताः
प्रविशंति यष्टयः प्रविशंतीत्यादौ कुंतादिभिरात्मप्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षि
प्यंते । तत उपादानेनेयं लक्षणा । गौरनुबंध्य इत्यादौ श्रुतिचोदितमनुबंधनं कथं स्यात्
इति जातिव्यक्तिराक्षिप्यते न तु शब्देनोच्यते । विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे ।
इति न्यायादित्युपादानलक्षणा नोदाहर्तव्या । न ह्यत्र प्रयोजनमस्ति न वा रूढिरियं । व्यक्त्य
विनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते यथा क्रियतामित्यत्र कर्त्ता । कुर्वित्यत्र कर्म । प्रविश पिंडी
लक्ष्यते २ अनुमीयते । मुख्यार्थे जाती ति ... हित प्रतीतिका ... मित्य ...

(3)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गौणत्वं साध्यये स्थितत्वात्. इति: साध्ययगुणत्वात्. इति: सकर्मका इतित्वात्. प्रवेशः सकर्मकः प्रवेशात्

स्तो ... मिश्रतलात्

त्रगंहस्मक्षयेतिच। पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र रात्रिभोजनं लक्ष्यते। श्रुतार्थापत्तेरर्था
पत्तेर्वा तस्य विषयत्वात्। गंगायां घोष इत्यत्र तटस्य घोषाद्यधिकरणत्वासिद्ध्ये गंगाशब्दः
स्वार्थमर्पयतीत्येवमादौ लक्षणेन पाल लक्षणा। उभयरूपान्वये शुद्धा। उपचारेणामिश्रत्वात्॥
अनयोर्भेदयोर्लक्ष्यस्य च लक्षकस्य च न भेदरूपं ताटस्थ्यं। तटादीनां गंगादिशब्दैः प्रतिपाद
ने तत्त्वे प्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः। गंगासंबंधमात्रप्रतीतौ तु गंगातटे
घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः। सारोपान्यातु यत्रोक्तौ विषयी विषयस्त
था। आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा ल
क्षणा सारोपा। विषय्यंतःकृते ऽन्यस्मिन् सा स्यात्साध्यवसानिका। विषयिणा आरोप्यमाणेनांतः
कृते निगीर्णेन्यस्मिन्नारोपविषये सति साध्यवसाना। भेदाविमौ च सादृश्यात्संबंधांतरत
स्तथा॥ गौर्वाहीक इत्यत्र ... आरोपाध्यवसानरूपौ सादृश्यहेतू भेदौ। गौर्वाहीक इत्यत्र
गौरयमित्यत्र च। अत्र हि स्वार्थसहचारिणो गुणा जाड्यमांद्यादयो लक्ष्यमाणा अपि गोशब्द
स्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयांतीति केचित्। स्वार्थसहचारिगुणाभेदेन परा
र्थगता गुणा एव लक्ष्यंते न तु परार्थोऽभिधीयते इत्यन्ये। साधारणगुणाश्रयणेन परार्थए
प्रतिपादयितुमिष्टत्रो ... तत् ज्ञाने ९ समानविभक्तिकपदद्वयं व लक्ष्यत इपम्॥

गौणत्वं ७ वाहीकः आरोपा वैधर्म्यप्रतीतिविषयो निर्दिश्येते गौस्त्वं गौपदतदर्थ अपचः ९

तात्कालधर्मसंबंधप्रतीतिर्लक्षणा ९ न कार्यकारणभावसंबंधादि १ वह्निधूमस्थले

उक्तं चान्यत्र। अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा
तु गौणता॥ इति। अविनाभावो ऽत्र संबंधमात्रं। न तु नांतरीयकत्वं तत्त्वे हि मंचाः क्रोशंतीत्यादौ
लक्षणा न स्यात्। अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणीयानुपयोगः इत्युक्तो। आयुर्घृतमा
युरेवेदमित्यादौ सादृश्यादन्यत्कार्यकारणभावादिसंबंधांतरं। एवमादौ च कार्यकारण
भावादिलक्षणसंबंधपूर्वे आरोपाध्यवसाने। अत्र गौणभेदयोर्भेदेऽपि तादृप्यप्रतीतिः सर्व
थैवाभेदावगमश्च प्रयोजनं। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारि
त्वादि क्वचित्तादर्थ्यादुपचारः। यथा इंद्रार्था स्थूणा इंद्रः। क्वचित्स्वस्वामिभावात्। यथा राजकीयः
पुरुषो राजा। क्वचित्तदवयवावयविभावात्। यथा अग्रहस्त इत्यत्राग्रमात्रे ऽवयवे हस्तः। क्वचित्ता
त्कर्म्यात्। यथा अतक्षा तक्षा। लक्षणा तेन षड्विधा। आद्यभेदाभ्यां सह सा च। व्यंगेन रहिता सा
च सहिता तु प्रयोजने। प्रयोजनं हि व्यंजनव्यापारगम्यमेव। तच्च गूढमगूढं वा। तत्र तिग्मं
गूढं यथा मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था
मतिः। उरो मुकुलितस्तनं जघनमंसबंधोद्धुरं बतेंदुवदनातनौ तरुणिमोद्गमो मोदते॥
अगूढं यथा। श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा विदग्धचरितानां। उपदिशति कामिनीनां

वैधर्म्यप्रतीतिकालीनाऽभेदप्रतीतिः साध्यवसानायां वैधर्म्यप्रतीतिकालीनाऽभेदप्रतीतिः सारोपायां। १
लक्षणा ७ गौर्वाहीकस्य इंद्रकार्यकारित्वात् ८

5

लाक्षणिकशब्दे ३ संकेताभावात् ६ प्रतिपादयितुमिच्छया ४

प्रयोजनस्य ५

नीनां यौवनमदस्य ललितानि। अत्रोपदिशतीत्यनायासेन शिक्षादानमभिधेयवत्स्फुटं
प्रतीयते। तदेषा कथिता त्रिधा। अव्यंग्यं गूढव्यंग्यमगूढव्यंग्यं च। तद्भूर्लाक्षणिकः। शब्द इति शेष
ध्यते। तद्भूः तदाश्रयः। तत्र व्यापारो व्यंजनात्मकः। कुत इत्यत आह। यस्य प्रतीतिमाधातुं लक्ष
णा समुपास्यते। फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया। प्रयोजनप्रतिपिपादयिषया
यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि तु तस्मादेव शब्दात्। न चात्र व्यंजना
दृते न्यो व्यापारः। तथाहि। नाभिधा समयाभावात्। गंगायां घोष इत्यादौ ये पावनत्वादयो
शालि ६ धर्मास्तटादौ प्रतीयन्ते तत्र गंगादिशब्दानां संकेतिताः। हेत्वभावान्न लक्षणा। मुख्यार्थबा
धादित्रयं हेतुः। तथा च। लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो। न प्रयोजनमेतस्मिन्न
च शब्दः स्खलद्गतिः। यथा गंगाशब्दः स्रोतसि सबाधस्तटं लक्षयति। तद्वद्यदि तटेपि सबा
धः प्रयोजनं लक्षयेत्। न च तटं मुख्योर्थो नाप्यत्र बाधः। न च गंगाशब्दार्थस्य तटस्य पावन
त्वाद्यैर्लक्षणीयैः संबंधः। नापि प्रयोजने लक्ष्यमाणे किंचित्प्रयोजनमस्ति। न च शब्दस्तट
मिव प्रयोजनं प्रतिपादयितुं समर्थः। एवमप्यनवस्था स्याद्या मूलक्षयकारिणी। एवमपी
ति प्रयोजनं च तल्लक्ष्यते तत्प्रयोजनांतरेण तदपि प्रयोजनांतरेणेति प्रकृताप्रतीतिहेतुरनव
स्था भवेत्। ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते। गंगायास्तटे घोष इत्यतोधिकस्यार्थ
गंगाशब्दस्य प्रयोजने न शक्तिग्राहकसंकेताभावात् ६

ख्यातत्वात् ७ अनुव्यवसायः घटमहं जानामीति ३ स्फुट ८

स्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा। तत्किं व्यंजनेनेत्यत आह। प्रयोजनेन सहितं लक्ष
णीयं न युज्यते। कुत इत्यत आह। ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतं। प्रत्यक्षादेर्नीलादि
विषयः फलं तु प्रकटता संवित्तिर्वा। विशिष्टे लक्षणा नैवं। व्याख्यातं। विशेषाः स्युस्तु लक्षिते।
तटादौ ये विशेषाः पावनत्वादयः ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारांतरेण गम्याः। तच्च व्यं
जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यं। एवं लक्षणामूलं व्यंजकत्वमुक्तं। अभिधाम
लं त्वाह। अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते। संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं॥
संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः। सामर्थ्य
मौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः। इत्युक्तदिशा।
सशंखचक्रो हरिः अशंखचक्रो हरिरित्युच्यते। रामलक्ष्मणाविति दाशरथौ। रामार्जुनगतिस्त
योरिति भार्गवकार्तवीर्ययोः। स्थाणुं भज भवच्छिदे इति हरे। सर्वं जानाति देव इति युष्मदर्थे। कु
पितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शंभौ। मधुना मत्तः कोकिल इति वसंते। पातु
वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वर इति राजधानीरूपाद्देशात् राजनि। चित्रभानु
र्विभातीति दिने रवौ। रात्रौ वह्नौ। मित्रं भातीति सुहृदि। मित्रो भातीति रवौ। इंद्रशत्रुरित्यादौ वेदे
इंद्रपदं विच्छेदशक्तेः द्रव्यस्य पर्यायानानार्थसाधनपदं प्रकरणाभावलाते अभ्येशक्तेल्लक्षणायां ऽक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपक्ष्माभ्यां एतावन्मात्रावस्थाए तोए

॥ ६॥ अंधिय पूलजलकेसि रगुही तासमत्ता तामिचरिल्ले॥ अमस्व दसारे लनिभ्भासदृनिःस्रहाविं अमपूम

इवन्ततकाव्येस्वरो विशेषप्रतीतिकृत् । आदिग्रहणात् । एद्दहमेत्तत्थणि आएद्दहमेत्तेहिं अच्छिवं
त्तेहिं एद्दहमेत्तावत्थाए एद्दहमेत्तेहिं दिअएहिं इत्यादौ वपिनयादयः । इत्युक्तसंयोगादिभिरर्थां
तराभिधायकत्वे निवारितेप्यनेकार्थस्य शब्दस्य यत्किंचिदर्थांतरप्रतिपादनं तत्र नाभिधा । निय
मनात्तस्याः न लक्षणा मुख्यार्थबाधाभावात् । अपितु व्यंजनमेव व्यापारः । यथा भद्रात्मनो दु
रधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य । यस्यानुपप्लुतगतेः परवारणस्य दा
नांबुसेकसुभगः सततं करोभूत् । तद्युक्तो व्यंजनः शब्दः । तद्युक्तो व्यंजनयुक्तः । यत्सोर्थांतरयुक्
स्था । अर्थोपि व्यंजकस्तत्र सहकारितया मतः । तदेति व्यंजकः ॥ इति काव्यप्रकाशे शब्दनिर्णयो
नाम द्वितीय उल्लासः ॥ ॥ अर्थाः प्रोक्ताः पुरा तेषां । अर्था वाच्यलक्ष्यव्यंग्याः । तेषां वाच्यक
लाक्षणिकव्यंजकानां । अर्थव्यंजकतोच्यते । कीदृशीत्याह । वक्तृबोद्धव्यकाकूनां वाक्यवा
च्यान्यसन्निधेः । प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां । योर्थस्यान्यार्थधीहेतुर्व्यापारो
व्यक्तिरेव सा ॥ बोद्धव्यः प्रतिपाद्यः । काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणं । अर्थस्य वाच्यलक्ष्य
व्यंग्यात्मनः क्रमेणोदाहरणानि । अइपिहुलं जलकुंभं घेत्तूण समागदम्हि सहि तुरिअं ।
समसेअसलिलणीसासणीसहा वीसमामि खणं । अत्र चौर्यरतगोपनं गम्यते । भणि

व्यंजनाभिकाव्य २

वैलक्षण्यात् ४

॥ ६॥

औन्निद्र्यं दौर्बल्यं चिंता आलस्यं सनिश्वसितं । मम मंदभागिन्याः कृते सखि त्वामपि परिभवेन सह ह ॥ ७

दोबल्लं चिंतो अल्लसत्तणं सणीसासं । मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ ॥ अत्र
व्रहूसा स्तकामुकोपभोगो व्यज्यते । तथाभूतां दृष्ट्वा नृपसदसि पांचालतनयां वने व्याधैः सार्द्धं सु
चिरमुषितं वल्कलधरैः ॥ विराटस्यावासे स्थितमनुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि भज
ति नाद्यापि कुरुषु ॥ अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काकुः प्रकाश्यते । न च वाच्य
सिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वं शंक्यं । प्रश्नमात्रेणापि काकोर्विश्रांतेः । तइ अम हे गड्ड
घल्लणि मिच्छं दिट्ठिण णेसि अण्णत्तो ॥ एण्हिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी ॥ अत्र मत्स
खी कपोलप्रतिबिंबितां पश्यतस्ते दृष्टिरन्यैवाभूत् । चलितायां तु तस्यामन्यैव जातेत्यहो प्रच्छ
न्नकामुकत्वं ते व्यज्यत इति । उद्देशोयं सरसकदलीश्रेणिशोभातिशायी कुंजोत्कर्षांकुरितर
मणीविभ्रमो नर्मदायाः । किं चैतस्मिन्सुरतसुहृदस्तन्वि ते वांति वाताः येषामग्रे सरति कलिता
कांडकोपो मनोभूः ॥ अत्र सुरतार्थं प्रविश इति व्यंग्यं । णोल्लेइ अणोल्लमणा अत्ता मं घरभरम्मि स
अलम्मि । खणमेत्तं जइ संझाइ होइ ण वा होइ वीसामो ॥ अत्र संध्या संकेतसमय इति तटस्थं
प्रतिकयाचिद्बोध्यते । सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण । एमेअ किं त्ति चि
ट्ठसि ता सहि सज्जेसु करणिज्जं ॥ अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुतेन न युक्तमिति निवार्यते ॥
श्रूयते समागमिष्यति तव प्रियोद्य प्रहरमात्रेण । एवमेव किमिति तिष्ठसि
ता सखि सज्जय करणीयं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि विहलं जल्ल कुंभमित्यत्र वक्तृवैलक्षण्यं वाच्यवैचित्र्यं लक्षप्रपंचप्रतीयते तथा च षष्ठपंक्तिनिर्देशः
न प्रतीयते कल्प ... तेनन क ... व्यंग्यप्रतीः ६
अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः॥ नाहं हि दूरं भ्रमितुं समर्था प्रसी
दतायं रचितोंजलिर्वः॥ अत्र च विविक्तोयं देश इति प्रच्छन्नकामुकस्त्वयाभिसार्यतामित्याश्वासो
प्रति कथयाभिनिवेद्यते। गुरुजनपरतंत्रे प्रियकिंकरणी॥ मितु ह मे ... ॥ अत्र हे ... अप
वासेव ज्ञसि वच्चसमंचे लं मुण सिंकरणिज्जं। अत्राद्यामधुसमये यदि व्रजसि तदहं तावन्नभवामि
तव तु न जानामि गतिरिति व्यज्यते। आदिग्रहणाच्चेष्टादेः चेष्टा यथा। द्वारोपांतनिरंतरमयि तमा
सौंदर्यसारश्रिया प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादिते। आनीतं पुरतः शिरोंशुकमधः
क्षिप्ते चले लोचने वाचस्तत्र निवारितं प्रसरणे संकोचिते दोर्लते॥ अत्र चेष्टया प्रच्छन्नकांतविष
यमाकूतविशेषो ध्वन्यते। निराकांक्षप्रतिपत्तये प्राप्तावसरतया पुनः पुनरुदाह्रियते। वक्त्रादीनामि
थः संयोगे द्विकादिभेदेनानेन क्रमेण लक्ष्यव्यंग्ययोश्च व्यंजकत्वमुदाहार्यं। वाच्यप्रमाणवेद्योर्थो
व्यनक्त्यर्थांतरं यतः। अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता॥ शब्देति न हि प्रमाणांतरवेद्योर्थो व्यंज
कः॥ इति काव्यप्रकाशेऽर्थनिर्णयो नाम तृतीय उल्लासः॥ ३॥ यद्यपि शास्त्रार्थे योनिर्णायक
ते दोषगुणालंकाराणां स्वरूपमभिधानीयं॥ तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत
इति प्रथमं काव्यभेदानाह॥ अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ॥ अर्थांतरे संक्रमितमत्यं
तं वा तिरस्कृतं॥ लक्षणामूलगूढव्यंग्यप्राधान्ये सत्येव अविवक्षितं वाच्यं यत्र स ध्वनावित्यनुवादाद्ध्व
काव्यत्वव्याप्य ... [illegible]
मनि ... [illegible]

तत्र लक्षणतावच्छेदकेन वाच्यार्थः प्रतीयते रूपे उपदेशे ... तेन संबोधयितुं रूपं अर्थः ... [illegible]
उपदेशरूपदेशादिरूपादि आमीत्यत्र अनन्यसाधारणत्वेन ... रूपाद्यविवक्षिततया परः
निरिति शेषः। तत्र वाच्यं क्वचिदनुपयुज्यमानत्वादर्थांतरे परिणतं यथा। त्वामस्मि वच्मि विदुषां स
मवायोत्र तिष्ठते॥ आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्॥ अत्र वचनादिरूपदेशादिरूपत
या परिणमति। क्वचित्तु नरनुपपद्यमानत्वादत्यंतं तिरस्कृतं। यथा उपकृतं बहु तत्र किमुच्यते सु
जनता प्रथिता भवता परं। विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतं॥ एतदपकारि
णं प्रति विपरीतलक्षणया कश्चिद्वक्ति॥ विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः॥ अन्यपरं व्यंग्य
निष्ठं एष च। कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः॥ अलक्ष्येति। न खलु विभावानु
भावव्यभिचारिण एव रसः अपि तु रसस्तैरित्यस्ति क्रमः न तु लक्ष्यते। तत्र रसभावतदाभासभा
वशांत्यादिरक्रमः। भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः॥ आदिग्रहणात् भावोदयभावसंधि
शबलत्वानि। प्रधानतया यत्र स्थितो रसादिः तत्रालंकार्यः यथोदाहरिष्यते। अन्यत्र तु प्रधाने वा
क्यार्थे यत्रांगभूतो रसादिस्तत्र गुणीभूतव्यंग्ये रसवत्प्रेयस्वि ऊर्जस्वि समाहितादयोलंकाराः ते
[illegible]
... जानाति करणाय कृता ... गुणीभूतव्यंग्याभिधाने उदाहरिष्यते। तत्र रसस्वरूपमाह॥ का
रणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ वि
भावा अनुभावास्तत् कथ्यंते व्यभिचारिणः॥ व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥ उक्त
व्यंग्यभूतरस ... भाव तदाभासभाव ... भावानुभावादिभिर्वाच्यैः रसादिव्यंग्य
यत्वे भवति ... [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि भारते। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। एतदेव विवृणुते। विभावैर्ल
लनोद्यानादिभिरालंबनोद्दीपनकारणैः स्थायीरत्यादिभावो जनितः अनुभावैः कटा
क्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यो व्यभिचारिभिर्निर्वेदादिभिः सहकारिभि
रुपचितो मुख्यया वृत्त्या रामादावनुकार्येनुसंधानान्नर्तके प्रतीयमानो रस इति
भट्टलोल्लटप्रभृतयः। राम एवायमयमेव राम इति न रामोयमित्यौत्तरकालिके बाधके
न रामोयमिति रामः स्याद्वा न वायमिति रामसदृशोयमिति च सम्यक्मिथ्यासंशय
सादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोयमिति प्रतिपत्त्या ग्राह्ये नटे
सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः। मनोरथश्रीर्मनसः शरीरि
णी प्राणेश्वरी लोचनगोचरं गतेति। दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च
अविरलविलोलजलदः कालः समुपागतश्चायं। इत्यादिकाव्यानुसंधानबलाच्छिक्षाभ्या
सनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि
तथा न मन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगात् गम्यगमकभावरूपादनु
मीयमानोपि वस्तुसौंदर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वे
न संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां चर्व्यमाणो रस इति श्रीशंकुकः।

विभावादिभिः ... कृतः १

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधा
तो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी स
त्त्वोद्रेकप्रकाशानंदमयसंविद्विश्रांतिसतत्त्वेन भोगेन भुज्यत इति भट्टनायकः। लोके प्रम
दादिभिः कारणादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वा
दिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते शत्रो
रेवैते न तटस्थस्यैवैते इति संबंधविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन
प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वे
न स्थितोपि साधारणोपायबलात्तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यां
तरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इ
वाभिन्नोपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्य
माणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वांगीणमिवालिंगन्नन्यत्सर्वमिव तिरोदधद् ब्रह्मा
स्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृंगारादिको रसः। स च न कार्यो विभावादिवि
नाशेपि तस्य संभवप्रसंगात्। नापि ज्ञाप्यः। सिद्धस्य तस्याभावात् अपि तु विभावादिभिर्व्यंजितश्चर्वणी
यः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न क्वचिद्दृष्टमित्यलौकिकत्वसिद्धेर्भूषण

८ विभावादिभिः ७ अथ प्रमातानुरागवान् ... निर्वर्तना ...
जनकज्ञापकाभ्यां ... अंतःकरणा ... ८ ... नियमाभिप्राय ... ९
ज्ञाप्यः २ ... ज्ञानवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञापकरूपदार्थो द्विधा कारको ज्ञापकश्च तत्र विभावादिभिर्न जन्यते न च ज्ञाप्यते किन्तु व्यज्यते तस्मात् नित्यः स्वात्मसंवेदनसिद्धत्वात्

मेतन्न दूषणं। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योप्युच्यतां। लौकिकप्रत्यक्षादिप्र
माणताटस्थ्यावबोधशालिपरिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितप
रिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयतां। तद्ग्रा
हकं च प्रमाणं न निर्विकल्पकं। विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकः। चर्व्यमाणा
स्यालौकिकानन्दमयस्य तस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य चोभयात्मकत्वमपि पू
र्ववत् लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः। व्याघ्रादयो वि
भावा भयानकस्येव वीराद्भुतरौद्राणामश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयो
श्चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मि
लिता निर्दिष्टाः। वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणिरभि
नवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे॥ इत्यादौ। परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु। कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवक
रिदन्तच्छेदपाण्डुः कपोलः॥ इत्यादौ। दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्य
रुणं गृहीतवसने किंचाञ्चितभ्रूलतं। मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि॥ इत्यादौ च यद्यपि विभावानामनुभावानामौत्सु

क्यव्रीडाहर्षकोपासूयाप्रसादादीनां व्यभिचारिणां केवलानामेवास्ति स्थितिस्तथाप्येतेषा
मसाधारणत्वादन्यतमद्वयापेक्षकत्वे सति नानैकान्तिकत्वमिति। तद्विशेषानाह। शृङ्गारहास्य
करुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः। तत्र शृङ्गारस्य द्वौ
भेदौ। संभोगो विप्रलम्भश्चेति। तत्राद्यः। परस्परावलोकनाधरपानपरिचुम्बनाद्यनन्तभेदत्वा
दपरिच्छेद्य इत्येक एव गण्यते॥ यथा। शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्या
जमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं। विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥ तथा। त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से म
नोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि। शय्योपान्तनिविष्टसस्मि
तसखीनेत्रोत्सवानन्दितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥ अपरस्त्वभिला
षविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः॥ क्रमेणोदाहरणानि। प्रेमार्द्राः प्रणयस्पृशः परिच
याद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि। यास्वन्तःकरणस्य बा
ह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥ अन्यत्र व्रजती
ति का खलु कथा नाप्यस्य तादृक् सुहृद्यो मां नेच्छति नागतश्च सहसा कोऽयं विधेः प्रक्रमः॥ इ
त्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे बाला वृत्तविवर्तनं व्यतिकरा नाप्नोति निद्रां नि
शि॥ एषा विरहोत्कण्ठिता॥ सापत्न्यः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोगवल्लनावक्रोतिसंसस्वनं॥स्वच्छेरश्रुकपोल्लम्लगलितैःपर्यस्तनेत्रोत्पलाबालाकेवल
मेवरोदितिलुठल्लोलोदकैरश्रुभिः॥प्रस्थानेव लयैःकृतप्रियसखैरस्रैरजस्रंगतंधृत्यान
क्षणमासितंव्यवसितंचित्तेनगंतुंपुरः॥यातुंनि[illegible]श्चितचेतसिप्रियतमेसर्वेसमंप्रस्थितागं
तव्ये सतिजीवितप्रियसुहृत्सार्थःकिमुत्सृज्यते॥यो मालिन्यप्रणयकुपिताधातुरागैःशिलायां
मात्मानंतेचरणपतितंयावदिच्छामिकर्तुं॥अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेक्रूरस्तस्मि
न्नपिनसहतेसंगमंनौकृतांतः॥हास्यादीनांक्रमेणोदाहरणं॥आकुंच्यपाणि[illegible]मशुचिंममसूर्ध्निवे
श्यामंत्रांभसांप्रतिप[illegible]पृषतैःपवित्रं॥तारस्वरंप्रहितथैत्कमनातृप्रहारंहाहाहतोहमितिरोदि
तिविष्णुशर्मा॥हामातस्त्वरितासिकुत्रकिमिदंहादेवताःक्वाशिषोधिक्प्राणाःपतितोशनिर्हुत
वहेः स्तेंगेषुदग्धेदृशौ॥इत्थंघर्घरमध्यरुद्धकरुणाःपौरांगनानांगिरःश्चित्रस्थानपिरोद
यंतिशतधाकुर्वंतिभित्तीरपि॥कृतमनुमतंदृष्टंवायैरिदंगुरुपातकंमनुजपशुभिर्निर्मर्या
दैर्भवद्भिरुदायुधैः॥नरकरिपुणासार्द्धंतेषांसभीमकिरीटिनामयमहमसृङ्मेदोमांसैःक
रोमिदिशांबलिं॥क्षुद्राःसंत्रासमेतेविजहितहरयःक्षुण्णशक्रेभकुंभायुष्मद्देहेषुलज्जांद
धातिपरममीसायकानिःपतंतः॥सौमित्रेतिष्ठपात्रंत्वमसिनहिरुषांनन्वहंमेघनादःकिंचि
द्भ्रूभंगलीलानियमितजलधिंराममन्वेषयामि॥ग्रीवाभंगाभिरामंमुहुरनुपततिस्यंद
नेबद्धदृष्टिःपश्चार्द्धेनप्रविष्टःशरपतनभयाद्भूयसापूर्वकायं॥दर्भैरर्द्धावलीढैःश्रमे ॥१७

भक्षितकण्ठमांसः ३ उत्कृन्नम् प्रेतांतकं ऊर्ध्वभागः २

विवृतमुखभ्रंशिभिःकीर्णवर्त्मापश्योदग्रप्लुतत्वाद्वियतिबहुतरंस्तोकमुर्व्यांप्रयाति॥उत्कृ
त्योत्कृत्यकृत्तिंप्रथममथपृथूत्सेधभूयांसिमांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्यु
ग्रपूतीनिजग्ध्वा॥आर्त्तःपर्यस्तनेत्रःप्रकटितदशनःप्रेतरंकःकरंकादंकस्थादस्थिसंस्थंस्थपु
टगतमपिक्रव्यमव्यग्रमत्ति॥चित्रंमहानेषुबतावतारःक्वकांतिरेषाभिनवैवभंगिः॥लोकोत्तर
धैर्यमहोप्रभावःकाप्याकृतिर्नूतनएषसर्गः॥एषांस्थायिभावानाहारकृतेर्मसम्बन्धःशोकश्च
क्रोधोत्साहौभयंतथा॥जुगुप्साविस्मयश्चेतिस्थायिभावाःप्रकीर्तिताः॥स्पष्टं॥व्यभिचारिणोप्युक्ता॥
निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥आलस्यंचैवदैन्यंचचिंतामोहःस्मृतिर्धृतिः॥
व्रीडाचपलताहर्षआवेगोजडतातथा॥गर्वोविषादऔत्सुक्यंनिद्रापस्मारएवच॥सुप्तंप्रबोधो
मर्षश्चाप्यवहित्थमथोग्रता॥मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच॥त्रासश्चैव वितर्कश्च
विज्ञेयाव्यभिचारिणः॥त्रयस्त्रिंशदमीभावाःसमाख्यातास्तुनामतः॥निर्वेदस्यामंगलप्राय
स्यप्रथममनुपादेयत्वेप्युपादानंव्यभिचारित्वेपिस्थायिताभिधानार्थं।तेननिर्वेदःस्थायिभावः।
शांतोपिनवमोरसोस्ति।यथा॥अहौवाहारेवाकुसुमशयनेवादृषदिवामणौवालोष्ठेवाबल
वतिरिपौवासुहृदिवा॥तृणेवास्त्रैणेवाममसमदृशोयांतुदिवसाःक्वचित्पुण्यारण्येशिवशिव
शिवेतिप्रलपतः॥रतिर्देवादिविषयाव्यभिचारीतथांजितः॥भावःप्रोक्तः॥आदिशब्दान्मुनि
महापुरुष[illegible]आलि।तद्रूपाणि[illegible]स्तवादयोनुभावाःधृति

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निद्रादरिद्रीकृतः ॥ निरोधेन अस्य भावोदय भावो

ऽगुरुनृपपुत्रादिविषयः। कांतादिविषया तु व्यक्तः शृंगारः। उदाहरणं। कंठकोणविनिविष्टमीश य
ते कालकूटमपि मे महामृतं। अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते। हरस्य घंसं अय
प्रति हेतुरेष ततः श्रुतस्य तद्वा वारि तत्र कृते स्तुषे॥ शरीरपाजोमवदीयदर्शनं व्यनक्ति कालत्रि
तयेपि योग्यतामिति एवमन्यदप्युदाहार्यं। व्यभिचारी यथा। जाने कोपपराङ्मुखी प्रियतमा स्व
प्नेद्य दृष्टा मया मा मा संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता ततः। नो यावत्परिरभ्य चाटुकशतैरा
श्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥ अत्र विधिं प्रत्यसूया। तदा
भासा अनौचित्यप्रवर्तिताः॥ तदाभासा रसाभासभावाभासाः॥ तत्र रसाभासो यथा। स्तुमः
दृढो ८ किं वामाक्षि क्षणमपि विना यं न रमसे विलेभे कः प्राणान् रणमखमुखे यं मृगयसे। सुलग्ने
को जातः शशिमुखि यमालिंगसि बलात्तपः श्रीः कस्यैषा मदननगरि ध्यायसि तु यं। अत्राने
ककामुकविषयाभिलाषे। तस्यास्तु मइत्याद्यनुगतं बहुव्यापारोपादनं व्यनक्ति। भावाभासो
यथा। राकासुधाकरमुखी तरलायताक्षी सास्मेरयौवनतरंगितविभ्रमास्या। तत्किं करोमि वि
दधे कथमत्र मैत्रीं तत्स्वीकृतव्यतिकरे क इहास्त्युपायः॥ अत्र चिंताऽनौचित्यप्रवृत्ता। एवम
न्येप्युदाहार्याः॥ भावस्य शांतिरुदयः संधिः शबलता तथा॥ क्रमेणोदाहरणं॥ तस्याः सान्द्रवि
लेपनस्तनयुगप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते। इत्युक्ते क

प्रति ग्रासादिस्ताग्म ध्ये कोपादेः संग्रहः २ परशुरामस्य ४

तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या स तद्विस्मृतं॥ अ
त्र कोपस्य। एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया
चाटूनि कुर्वन्नपि। आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितः तत्क्षणान्मा भूत्सुप्त इवेत्यमंदव
लितग्रीवं पुनर्वीक्षितः॥ अत्रौत्सुक्यस्योत्कलिकस्य तपः पराक्रमनिधेरभ्यागमादेकतस्तत्सं
ह नृ गप्रियतात्वच वीररभसोत्फालश्च मां कर्ष[illegible]ततः॥ [illegible] देहापरिरंभ एव च मुहु
ने श्चैतन्यमामीलयन्नानंदी हरिचंदनेंदुशिशिरस्निग्धो रुणद्ध्यन्यतः॥ अत्रावेगहर्षयोः। क्वाका
चेद्रुने र्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कांतं मुखं।
शोज किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योध
मनु रं धास्यति॥ अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां भावशबलता सकांता दा
हृता। मुख्ये रसेपि तेंगित्वं प्राप्नुवंति कदाचन। ते भावशांत्यादयः॥ अंगित्वे राजानुगतो विवाहप्र
अनु वृत्तभृत्यवत्॥ अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तु यः॥ शब्दार्थोभयशक्त्युत्थस्त्रिधा स क
रूप थितो ध्वनिः॥ शब्दशक्तिमूलानुरणनरूपव्यंग्योर्थशक्तिमूलानुरणनरूपव्यंग्यः॥ उभयशक्ति
ने ४ मूलानुरणनरूपव्यंग्यश्चेति त्रिविधः॥ तत्रालंकारोपवस्त्वेव शब्दाद्यत्रावभासते। प्रधान
त्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा॥ वस्त्वेवेति अनलंकारं वस्तुमात्रं। आद्यो यथा। उल्लास्य का
अत्र भावादीनां ग्रस्य ल[illegible] करवालमहांबुवाहं देवेन येन जरठोर्जितगर्जितेन।
४ अभावत्वं ५ मोत्तापास्थिते अयमायमानुल्लासरसादनापाये तिकमतीतेनऊर्ध्वमावृत्वा
तमुख्यत्वं भावादीनां ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ पथिकनात्र संस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे ॥ उन्नतपयोधरान् प्रेक्ष्य यदि वससि
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥ अत्र वाक्यस्यासंब
द्धार्थाभिधायित्वं मा प्रसाक्षीदित्यप्राकरणिकप्राकरणिकयोरुपमानोपमेयभावः कल्प
नीय इत्यत्रोपमालंकारो व्यंग्यः ॥ तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ॥
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणी विभाति भवान् ॥ अत्रैकैकस्य पदस्य द्विपदत्वे
विरोधाभासः ॥ अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो । अहितः सहितः साधुयशोभिरसतामसि
अत्रापि विरोधाभासः । निरुपादानसंभारमभित्तावेव तन्वते । जगच्चित्रं नमस्तस्मै कलाश्लाघ्या
य शूलिने ॥ अत्र व्यतिरेकः । अलंकार्यस्यापि ब्राह्मणश्रमणन्यायेनालंकारता । वस्तुमात्रं यथा ।
पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे । उण्णअपओहरं पेक्खिऊण जइ वससि ता वस
सु ॥ अत्र यद्युपभोगक्षमोऽसि तदास्स्वेति व्यज्यते ॥ शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र य
स्मै त्वं । यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥ अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरु
त इति ध्वन्यते ॥ अर्थशक्त्युद्भवोऽप्यर्थो व्यंजकः संभवी स्वतः । प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भित
स्य वा । वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् । वस्त्वलंकारमथवा तेनायं द्वादशात्मकः ॥
यत्र शब्दाः परिव [illegible] त्तिसहा न भवंति [illegible] स शब्दशक्त्युद्भवः १ अर्थशक्त्युद्भवे त्वर्थाः परिवृत्तिस नौ २ ॥१२॥
हा न भवंतीत्यर्थः १

अलससिरोमणिधूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः ॥ इति भणितेन नतांगी प्रफुल्लविलोचना जाता ५
अर्थो द्विविधः स्वतःसंभवी । कविप्रतिभाकल्पितश्चेति । तत्र स्वतःसंभवी न केवलं भणिति
मात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः । कविना प्रतिभामात्रेण बहिरसन्नपि
निर्मितः । कविनिबद्धस्य वक्तुरिति द्विविधोऽपरस्त्रिविधः ॥ वस्तु वालंकारो वासाविति षा
ड्व्यंजकः । तस्य वस्तु वालंकारो वा व्यंग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः । क्रमेणोदा
हरणानि ॥ अलससिरमणी धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ । इअ भणिएण णअंगी
पप्फुल्लविलोअणा जाआ ॥ अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते । धन्यासि या कथय
सि प्रियसंगमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु । नीवीं प्रति प्रणिहिते च करे प्रियेण सख्यः
शपामि यदि किंचिदपि स्मरामि ॥ अत्र त्वमधन्येति व्यतिरेकालंकारः ॥ दर्पान्धि
गंधगजकुंभकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः ॥ वीरैर्व्यलोकि युधि कोप
कषायकांतिः कालीकटाक्ष इव यस्य करे कृपाणः ॥ अत्रोपमालंकारेण सकलरिपुक्षयः
क्षणात्करिष्यत इति वस्तु । गाढकांतदशनक्षतव्यथासंकटादरिवधूजनस्य यः । ओष्ठवि
द्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरं ॥ अत्र विरोधालंकारेणाधरदर्शनस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केशोत्तुङ्गबन्धादामोऽप्यतेनसमरेजयश्रीर्गृहीता ॥ यथा केदराभिर्विधुराः रस्तस्य दृढकंठे संस्थापिताः
अलंकारः १ शेषवत्
१२ मकालमेवच्चात्रवोध्यापादिताइतितुल्ययोगिता ॥ ममक्षत्याप्यन्यस्यक्षतिर्निर्वर्त्ततइतितद्
द्विरुक्तेऽस्पृतइत्यसंक्षाञ्च ॥ एषूदाहरणेषुस्वतःसंभवी व्यंजकः ॥ कैलासस्य प्रथमशिखरे
वेणुसंमूर्छनाभिः श्रुत्वाकीर्त्तिं विबुधरमणीगीयमानां त्वदीयां ॥ स्रस्तापांगाः सरसबिसिनीकां
डसंजातशंकादिङ्मातंगाः श्रवणपुलिने हस्तमावर्त्तयंति ॥ अत्रवस्तुनायेषामप्यधोऽधि
गमो नास्ति तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोतीत्व ॥ कीर्त्तिरितिवस्तु ध्वन्यते ॥ वि
सेसुव्वलामोडियवेणासमरम्मिजस्सिरीगहिआ ॥ जहकेदराहिविहुरातस्सदिढकंठआम्मि
संठविआ ॥ अत्रकेशग्रहणावलोकनोद्दीपितमदना इवकेदरास्तद्विधुरान् कंठेगृह्
नीन्तस्सेति ॥ एकत्रसंग्रामे विजयदर्शनात्तस्यारयः पलाय्यगुहासु तिष्ठंतीति काव्यहेतुः ॥ न
शत्रु पलाय्य गतास्तद्वैरिणो पितुर्तैः पराभवसंभाव्यता न केदराः न त्यजतीत्यपहुतिश्च ॥ गाढा
स्पः लिंगणरहसुज्जअम्मिदइएलहुसमोसरइ ॥ माणसिणीए माणो पीडणभीउव्वहिअ
आहि ॥ अत्रोत्प्रेक्षयाप्रत्यालिंगनादितत्रजृंभितेइतिवस्तु ॥ जाडइबहसंतीकइवअणा
म्बुरुहबद्धविणिवेसा ॥ दावेइभुवणमंडलमण्णंविअ जअइसावाणी ॥ अत्रोत्प्रेक्षया चमत्कारक
कारणं नवं नवं जगदजडासनस्थानि निर्मीतइतिव्यतिरेकः ॥ एषु कविप्रोढोक्तिमात्रनि
यास्त्वविरिंचिमिव हसन्तीकविवदनाम्बुरुहबद्धविनिवेशा ॥ दर्शयति भुवनमंडलमन्य कोव्यालिंगमल
ब्रह्मणो दिव जयति सावाणी ॥ ३ ११२

अ० प० ७१ पदवाक्ययोः स्फोटः ८ सामान्यधर्मप्रकारकेऽन्यविशेषधर्मप्रकारकेऽनिश्चये तस्मात् संशयो
श्रीगणेशाय नमः ॥ एवमस्य कारणमुक्त्वा स्वरूपमाह ॥ तद्दोषौ शब्दार्थौ सगुणाव
नलंकृती पुनः क्वापि ॥ दोषगुणालंकारा वक्ष्यते ॥ क्वापीत्यनेनेतदाह ॥ यत्सर्वत्र सालं
कारौ क्वचित्तु स्फुटालंकारविरहेपि न काव्यत्वहानिः ॥ यथा ॥ यः कौमारहरः स एव हि
वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः ॥ सा चैवा
स्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कं
ठते ॥ अत्र स्फुटो न कश्चिदलंकारः ॥ रसस्य हि प्रधानत्वान्नालंकारता ॥ तद्भेदान्क्र
मेणाह ॥ इदमुत्तममतिशयिनि व्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥ इदमिति काव्यं ।
बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कथितः ।
ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यंग्यव्यंजनक्षमस्य शब्दार्थयुग
लस्य ॥ यथा ॥ निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोधरो नेत्रे दूरमनंजने पुलकिता
तन्वी तवेयं [illegible] तनुः ॥ मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे वापीं स्नातु
मितो गतासि न पुनस्तस्याधमस्यांतिकं ॥ अत्र तदंतिकमेव रंतुं गतासीति प्राधान्येना
धमपदेन व्यज्यते ॥ अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यमं ॥ अतादृशि वाच्यादनतिशा
चमत्कारकारिणि ७ व्यतिरेकालंकारः ४ यिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

14

मदन व्यापकदारा मत ॥१ स्वरूपनेनेने निस्वरूपं विशेषा आगमिष्यर्थः ... वाच्यस्तु ... अति पाद्या ॥१८

॥१॥ काव्यलिंगमलंकारः

यथा। ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरं। पश्यन्त्या भवति मुहुर्नितरां मलिनामु
खच्छाया॥ अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव
चमत्कारिकारित्वात्। शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतं। चित्रमिति गुणालंकारयु
क्तं। अव्यंग्यमिति स्फुटप्रतीयमानार्थरहितं। अवरं। अधमं। यथा। स्वच्छन्दोच्छलदच्छकच्छकुह
रच्छातेतराम्बुच्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः॥ भिंद्यादुद्यदुदारद
र्दुरदरी दीर्घादरिद्रद्रुमद्रोहोद्रेकमयोर्मिमेदुरमदा मन्दाकिनी मन्दतां॥ विनिर्गतं मानद
मात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यं॥ ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव
भियामरावती॥ ॥ इति श्रीकाव्यप्रकाशे काव्यप्रयोजनकारणस्वरूपविशेषनिर्णयो
नाम प्रथमोल्लासः॥ क्रमेण शब्दार्थयोः स्वरूपमाह॥ स्याद्वाचको लाक्षणिकः शब्दोऽत्र
व्यञ्जकस्त्रिधा। अत्रेति काव्ये। एषां स्वरूपं वक्ष्यते। वाच्यादयस्तदर्थाः स्युः। वाच्यलक्ष्यव्यं
ग्याः। तात्पर्यार्थोऽपि केषुचित्। आकांक्षायोग्यतासंनिधिवशाद्वक्ष्यमाणस्वरूपा
णां पदार्थानां परस्परसमन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लस
तीत्यभिहितान्वयवादिनां मतं। वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः। सर्वे

इत्येषालंकारः ... वाच्यार्थ ... लक्षण ... ४

संसर्गः तात्पर्यरूपा ... वाक्यार्थः ... संयोगत्वसमवायत्वादिरूपविशेषरूपेणाभासमानः ॥१॥

ये लंकागिरिमेखलासु स्खलिताः संभोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वं। ते
प्यन्त्यः। जे लंकागिरिमेहलाहि खलिदा संभोअखिन्नोरईफारफुल्लफणावलीकवलणे पत्ता
दरिद्दत्तणं॥ ते एण्हिं मलयानिला विरहिणीणीसाससंपक्किणो जादा झत्ति सिसुत्तणे वि बहला ता
रुण्णपुण्णा विय॥ अत्र निश्वासैः प्राप्तैश्वर्याः किं किं न कुर्वत इति वस्तुना वस्तु व्यज्यते॥ सो हि विर
हउणा मानस्स मज्झ धीरत्तणेण आसासं॥ पिअदंसणविहलखलंखणम्मि सहसत्ति तेण ओ
सारिअं॥ अत्र वस्तुना उत्तमेऽपि प्रार्थने प्रसन्नेति विभावनाप्रियं दर्शनस्य सौभाग्यबलं ध्वे
यमित्यलंकारेण वस्तु व्यज्यते इत्युत्प्रेक्षा चेति। तुल्लोलकररुअणारुण एहि तुह लोअणेसु मह दिण्णं॥
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिआ॥ अत्र लोचने किमिति कुपितेव हसितस्तु
तरालं कारणं न केवलमार्द्रं न रक्षतानि गोपयसि यावत्तेषां महत्प्रसाददानं जातमिति वस्तु
महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती॥ अणुदिणमणण्णकम्मा अंगं तं
णुअं पि तणुएइ॥ अत्र हेतवं ले कारणं तनोस्तनूकरणेऽपि तत्र द्वयेन क्तेत इति विशे
षोक्तिः॥ एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रशरीरो व्यंजकः॥ एवं द्वादश भेदाः॥ श
ब्दार्थोभयशक्त्युद्भवस्त्वेकः यथा॥ अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा॥ तारकातरलाश्यामा सा
नन्दं न करोति कं॥ भेदा अष्टादशास्य तत्॥ अस्येति ध्वनेः॥ ननु रसादीनां बहुभेदत्वे कथम
ष्टादशेत्यात आह॥ रसादीनामनन्तत्वाद्भेद एको हि गण्यते। अनन्तत्वादिति। तथा हि। नवरसाः
मपस्त्ते॥ उत्पीडकरयुरदनक्षतैस्तवल्लोचने यो मम कत्तः॥ एकांशुकप्रसादः कोपेन पुनर्न मे आक्षं
महिलासहस्सभरिते तव हृदये सुभग सा अमाती॥ अनुदिनमनन्यकर्मा अंगं तनुकमपि तनयति हृ ते॥१८

(18)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥ णां वेदस्वीकार प्रवृत्तस्सहत ... दिपदत्याग सामादि ... चानाख्य ... [illegible]
स्वकार्यकारित्वस्वापकारित्व प्रमाणत्वादि व्यं यानि क्रमात् इदानीं
तत्र श्रृंगारस्य द्वौ भेदौ। संभोगो विप्रलंभश्चेति। संभोगस्य परस्परावलोकनालिंगनपरि
चुंबनादिकुसुमोच्चयजलकेलिसूर्यास्तमयचंद्रोदयऋतुषड्वर्णनादयः॥ बहवो भेदाः विप्र
लंभस्याप्यभिलाषादयउक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यात्तत्रापि नायकयो
रुत्तममध्यमाधमप्रकृतित्वे तत्रापि देशकालावस्थाभेद इत्येकैकस्यैव रसस्यानंत्यं का गण
नान्येषां। असंलक्ष्यक्रमस्य तु सामान्यमाश्रित्य रसादिध्वनिरेक एव गण्यते। वाक्यद्यु
त्य इति शब्दार्थोभयशक्तिमूलः॥ पदेप्यन्ये अपि शब्दात् वाक्यार्थ एकावयवावस्थितेन पद
वर्णेन कामिनीव पदद्योत्येन व्यंग्येन वाक्यव्यंग्यापि भारती भासते॥ तत्र पदप्रकाश्य
त्वे क्रमेणोदाहरणानि। यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा। अनुकंप्योनुकंप्यश्च
सज्जातः स च जीवति॥ अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्वनियंत्रणत्वस्नेहपात्रत्वादिरूपार्था
तरसंक्रमितवाच्याः। खलव्यवहारा दृश्यंते दारुणा जहत्वेते तथापि धीराणां॥ अत्र
बहुमान्यानां कुर्वन्त्यसाध्य विमुञ्चन्ति। अत्र विमुञ्चन्तीति। लावण्यं तु दसौ कान्तिस्ते रूपं स वचः क्र
मः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥ अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्र
काश्यंते। यथा वा मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं बधान
ऋजुतां दूरे कुरु प्रेयसि। सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस
खलव्यवहारादस्यंते दारुणाय यद्यपि तथापि धीराणां। हृदयवयस्य बहुमता न खलु व्यवसाया
विमुच्यन्तीति॥५ अत एव सामान्यमाश्रित्यैकः ५ विमुच्यन्तीत्यस्य विच्छेदः ... [illegible]
... त्र तदादिपदैः विप्रलंभो ध्वन्यते ... [illegible]

भीतपदपदेनोपमालंकारो व्यज्यते ५ सदा ... मनेन संकेतदानाह ... व्यज्यते ५
सख्यास्त्वागमः ५ रसाधिक्यं २
हृदि स्थितो हि न नु मे प्राणेश्वरः श्रोष्यति॥ अत्र भीताननेति। एतेन हि नीचैः शंसेति विधानस्य
युक्तता गम्यते। भावादीनां पदप्रकाश्यत्वे अधिकेन वैचित्र्यमिति न तदुदाह्रियते। रुधिरविस
रप्रसाधितकरालकरवालरुचिरभुजपरिघः। स्फुटितिफटत्कुटिविटंकितललाटपट्टो विभा
ति नृपभीमः॥ अत्र भीषणीयस्य भीमसेनेनुपमाने॥ भुक्तिमुक्तिकृदेकांतसमादेशनतत्परः॥
कस्य नानेदानीं ध्वन्ते विदधाति सदागमः॥ अत्र काव्यस्य केतदायिनमभिमुखयायत्यागोस
ति। सायं स्नानमुपासितं मलयजेनांगं समालेपितं यातोस्ताचलमौलिमंबरमणिर्विस्रब्ध
मत्रागतिः॥ आश्चर्यं तव सौकुमार्यमभितः क्लांतासि येनाधुना नेत्रद्वंद्वममीलनव्यतिकरं श
क्नोति ते नासितुं॥ अत्र वस्तुना कृतपरपुरुषपरिचया क्लांतासीति वस्तुधुनापदद्योत्यं व्य
ज्यते॥ तदप्राप्तिमहादुःखविलीनाशेषपातका। तच्चिंताविपुलाह्लादक्षीणपुण्यचया तथा॥
चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ अत्र ज
न्मसहस्रैरुपभोक्तव्यानि दुःकृतसुकृतफलानि वियोगदुःखचिंताकृताह्लादाभ्यामनुभूतता
नीत्युक्तं। एवं चाशेषचययत्रादद्योत्यमतिशयातीति॥ क्षणदासौ नक्षणदा वनमवनं व्यसनमव्य
सनं। बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वं॥ अत्र शब्दशक्तिमूलविरोधांगेन
विधिरपि वाम नुवर्त्तत इति सर्वपदद्योत्यं वस्तु।
... रसवदादि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तनवल्लभस्य शतरासीदधरो म्लानकमलदलं॥ इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखं॥१७
रात्रिषु चंद्रधवलासु ललितमास्फाल्य यः चापं। एकच्छत्रमिव करोति भुवनराज्यं विभ्रमः स गणः॥ ३
उत्वेल्लहसुगोसम्मि आसि अहरो मिल्लाणकमलदलो॥ इअ णववहूए सोऊण कुणइ वयणं
महीसम्मुखं॥ अत्र रूपकेण तथाचयास्य मुहुर्मुहुः परिचुंबनं कृतं येन म्लानत्वमिति मित्याप्या
दिपदद्योत्ये कोप्यलिंगाय एष स्वरतः संभवी व्यंजकः॥ राईसु चंदधवलासु ललिअमप्फा
लिऊण जो चावं एकच्छत्तं विअ कुणइ भुअणरज्जं विअंभंतो॥ अत्र वस्तुनीयोथ कामिना
मस्मोरराजास्मरस्याधानकल्पितदादेशपराङ्मुखइतिजायकिंकपभोगपरस्वतो निशा
तिवासतइति भुवनराज्यपदद्योत्य वस्तु प्रकाश्यते॥ निशितशरधियार्पयत्यनंगो दृशोसु
दृशः स्वबलं वयस्यराले॥ दिशिनि पततिय च सान्वतत्र व्यतिकरमेयसमुन्मिषत्यवल्लः॥
अत्र वस्तुना युगपदवस्त्राः परस्परविरुद्धापि भवंतीति व्यतिकरपदद्योत्यो विरोधः॥
वारिज्जंतो विपुणो सदावकन्थिएण हिअएण। थणहरवअंस्स एणे विसुद्धजाईण चलयि
सेहारो॥ अत्रा विसुद्ध जाति लक्षणेन हत्वलं कारेण हारो नवरतं कंपमान एवास्ति इति नचव
तीति पदव्यंग्ये वस्तु। सो मुद्ध सामलंगो धम्मिल्लो कलिअ ललिअ णिअदेहो। तीये खंधाये ब
लं गहिअ सरोसुरअसंगरे पुरअसंगरे पुज अअ॥ अत्र रूपकेण मुहुराकर्षणेन तथाकेशपा
तिर्नचलस्तितस्याहारः॥४॥ स मुग्धश्यामलांगो धम्मिल्लो ललित कलितनिजदेहः॥ तस्याः स्कंधात् बलं
गृहीत्वा स्मरःसुरतसंगरे जयति॥२

तेन हेतुः प्रतिपा २

नवपूर्णिमामृगांकस्य सुभग कस्त्वमसि प्रणममसत्यो। कासौभाग्यसमया प्रदोषरजनीवतवाद्य॥ २
क्षिथिमिति
स्कंधयो भ्रातस्य धाराशि। चिरतावपि आनिश्चिता भिलाषः कामुखो स्फुरदिस्कंधपदद्योत्या वि
भावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः॥ पाववपुण्णिमामिअंकस्स सुहअ कोत्तसिपणसु
महसच्चं। कासोहग्गसमग्गा पओसरअणिव्व तुह अज्जा। अत्र वस्तुना मयी वान्यस्यामपि प्रथमम
नुरक्तस्त्वं न तु तद् इति नवेत्यादिप्रश्नोत्तरे स्यादिपदद्योत्यं वस्तु व्यज्यते॥ सिहिणवणिहुवणसमरम्मि ऊ अंग
कपालीसहीए णिविडाए। हारो णिवारिओ व्विअ उच्छरंतो तदो कहरमिआ॥ अत्र वस्तुना हारच्छेदानं
तरमन्यदेव रतमवत्थ्यमभवत्तत्कथयकीदृगिति व्यतिरेकः। कहपदगम्यः॥ पविसंती घरवारं विच्छ
लिअवअणा पुलोइऊण पह खंधा घेत्तूण घडं हा हा णट्ठो त्ति रूअसि सहि कित्ति॥ अत्र वल्ले कारणं
संकेतनिकेतनं गच्छंतं दृष्ट्वा प्यदितश्च गंतुं इच्छसित दपरघटं गृहीत्वा गच्छति वस्तु कित्तिपदव्यंग्यं॥ यथा
वा। विहलं खलं तुअं सहि दट्ठूण कुडेण तरलदिट्ठी। वारप्पसंमिसेण अप्पाण रूओसि पाडिओ विष्फा
णो॥ अत्र नदी तीरलतागृहकृतसंकेतमज्ञातं गत्वा प्रवंचावसरेपश्चादागतं दृष्ट्वा पुनर्नदीगमनाय
द्वारघातव्याजेन बुद्धिसर्वं व्याकुल यातया घटस्फोटितइति मयाच्चेति तेन किंमितिना स्वसिषितस्त
मीहितासिद्धये वजा। अहं तेभ्यश्च निकटे संभवंसमर्थो येप्य इति द्वारस्पर्शेन व्याजेन स्पष्टं स्वाव स्तु।
जो ण्हाए एममहुरसेण विइण्णतारुण्ण उस्सुअमणा सा। बुड्ढा वि णववोढव्व परवहू अहह हरइ
विद्धलोलासखिवदृष्ट्या तरलदृष्टिः। द्वारस्पर्शे मिषेणात्मा गुरुपतिपातयिता विषमः॥५ यथा
ज्योत्स्नया मधुररसेनच वितीर्णतारुण्योत्सुकमनाःसा। वृद्धापि नवोढेव परवधूरहहहरतितेषु

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुप्तिङन्तं पदं। तदेकदेशाः प्रकृतिः प्रत्ययश्च। प्रकृतिरपि नामधातुभेदाद्द्विधा। प्रत्ययोऽपि सुप्तिङादिभे
॥१९॥ दाद्विधा। देवदत्तादिनामरूपा प्रकृतिर्भवतीति [illegible] धातुरूपा
इलुहहि [illegible]। अत्र काव्यलिंगेन वक्त्रोपरवक्त्रं चास्मानुस्मृत्वा [illegible] तिलपदे माचरितुं नश
क्यमित्याक्षेपः परवक्त्रस्य [illegible]। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्र
काश्यत्वं सर्वमुदाहृतं। शब्दार्थोपि यत्रात्युत्थस्तु पदप्रकाश्येन भवतीति पंचत्रिंशद्भेदाः। प्रबंधे
प्यर्थशक्तिः। यथा गृध्रगोमायुसंवादादौ। तथा च - अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसं
कुले॥ कंकालबहुले घोरे सर्वप्राणिभयंकरे॥ न चेह जीवितः कश्चित्कालधर्ममुपागतः। प्रियो वा
यदि वा द्वेष्यः प्राणिनां गतिरीदृशी॥ इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनं। आ
दित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं। बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन॥ अमुं कनकवर्णा
भं बालमप्राप्तयौवनं। गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशंकिताः॥ इति निशि विजृंभमाण
स्य गोमायोर्जनव्यावर्तनं निष्ठं चेति प्रबंध एव प्रथते। अन्ये चैकादश भेदा ग्रंथविस्तर
भयान्नोदाहृताः। स्वयं तु लक्ष्यतोऽनुसर्तव्याः। अपि शब्दात्पदवाक्ययोः। पदैकदेशरचनावर्णे
ष्वपि रसादयः। तत्र प्रकृत्या यथा। रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअल
स्स। रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ॥ अत्र जयतीति न तु शोभत इत्यादि समा
नोपि हि स्थगनव्यापारलोकोत्तरेणैव रूपेणास्याभिधानमिति तद्वात्सल्यं। यथा प्रयान्त्सोय
रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य। रुद्रस्य तृतीयनयनं पार्वती ॥१९॥
परिचुंबितं जयति॥

ग्रामीणास्मि ग्राममेवसा। मि नगरस्थितिं न जानामि। नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥१॥
मपाहृतः सत्रापथं पादानतः कांतया द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः। ताव
त्प्रत्युत पाणिसंपुटलसन्नीवीनिबंधं धृतो धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः॥
अत्र पदानीति न तु द्वाराणीति तिङ् सुपां यथा। पथि पथि शुकचंचूचारुरागांकुराणां दिशि दि
शि पवमानो वीरुधां लासकश्च। नरि नरि किरति द्राक् सायकान् पुष्पधन्वा पुरि पुरि च निवृ
त्ता मानिनीमानचर्चा॥ अत्र किरतीति किरणस्य साध्यमानत्वं [illegible] निवृत्तेति निवर्तनस्य सिद्ध
त्वं तिङा सुपा च तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते। यथा वा॥ लिखन्नास्ते भूमिं बहिरवनतः
प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः॥ परित्यक्तं सर्वं हसितपठितं पंजर
शुकैस्तवावस्था चेयं विसृज कठिने मानमधुना॥ अत्र लिखन्निति न तु लिखतीत्यपि तु प्रसाद पर्य
न्तमास्त इति। तथा आस्त इति न तु आसीत् [illegible] मिति न तु भूमाविति। न हि बुद्धिपूर्वकं किंचि
ल्लिखतीति तिङ् सुपां विभक्तीनां वचनस्य संबंधस्य यथा॥ गामारुहम्मि गामे वसामि णअरट्टि
इं ण आणामि। णाअरिआणं पइणो हरेमि जा होमि सा होमि॥ अत्र नागरिकाणामित्यना
दरषष्ठ्याः। रमणीयः क्षत्रियकुमार आसीदिति कालस्य। एषा हि भग्नमहेश्वरकार्मुके दाश
रथिं प्रति कुपितस्य भार्गवस्योक्तिः॥ वचनस्य यथा। ताणं गुणग्गहणाणं ताणुक्कंठाणं तस्स
ताणं भणिआणं सुंदर एरिसअं जाअमवसाणं॥ पेम्मस्स॥
तेषां गुणग्रहणानां तासामुत्कंठानां तस्य प्रेम्णः। तेषां भणितानां सुंदर ईदृशं जातमवसानं॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र गुणग्रहणादीनां बहुत्वे प्रेम्णश्चैकत्वं द्योत्यते। पुरुषव्यत्ययस्य यथा। रे रे चंचललोचनां
चितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि। किं मन्ये वि
हरिष्यसे बत हतां मुंचांतराशामिमामेषा कंठतटे कृता खलु शिला संसारवारांनिधौ॥ अ
त्र प्रहासः। पूर्वनिपातस्य यथा। यशोदाबल्लमेव दुर्बलतया तत्समतां स्तेनापि प्रायः केवलनी
तिरीतिशरणैः कार्यं किमुर्वीश्वरैः। ये क्ष्माशक्र पुनः पराक्रमनयस्वीकारकांतक्रमास्ते स्यु
र्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परं॥ अत्र पराक्रमस्य प्राधान्यं गम्यते। विभक्तेर्वि
शेषस्य यथा। प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसं॥ दिवसेन तु नरप भवा
न युद्धविधिसिद्धसाधुवादपदं॥ अत्र दिवसेनेत्यपवर्गतृतीया फलप्राप्तिं द्योतयति। भ
योक्तयः सविधनगरीरथ्यामापर्यटंतं दृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्थः। साक्षात्का
मं नवमिव रतिर्मालती माधवं यद्गाढोत्कंठा ललितलुलितैरंगकैस्ताम्यतीति॥ अत्र अनु
कंपावृत्तेः करूपतद्धितस्य। परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननु
भवपथं यो न गतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यंतर्जडयति च तापं
च कुरुते॥ अत्र प्रवादस्यापसर्गस्य। कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च

पदवाक्यपदैकदेशरचनावर्णेप्रबंधप्रकाश्यः उपदेशात्सप्तदशप्रभेदौ क्रियाकर्मकारकपदवाक्ययोः
पंचविंशतिः ... प्रबंधप्रकाश्यातिरसः ... धनिश्चेतिविधेः पदे ...
नोद्दिष्टः। तमासितिष्ठेति हितावदेशुमान्यया वदायास्फुरद्यादिमोलितामूः॥ तुल्ययोगि
ताद्योतकस्य च इति निपातस्य। रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यवि
पर्ययाद्यदि परं देवो न जानाति तं॥ बंदीवैष यशांसि गायति मरुद्यस्यैकबाणाहति श्रेणी
भूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥ अत्र असाविति भुवनेष्विति गुणैरिति सर्व
नामवचनप्रातिपदिकवचनानां। न त्वदिति न मदिति। अपितु अस्मदित्यस्य सर्वाक्षेपिणो भा
ग्यविपर्ययादिति। अन्यथा संपत्तिमुखे न तत्त्वभावमुखेनाभिधानस्य। तरुणिमनि कृतव
तिकल्या मनु मदनधनुर्भुवोः पत्रस्य॥ अधिवसति सकललललनामौलिमियं चकितह
रिणनयना॥ अत्र इमनिच् अव्ययीभावकर्मभूताधाराणां स्वरूपस्य। तरुणत्वमिति धनुषः
समीपमिति मौलाववसतीत्यत्र तु तादृक्चमत्कृत्ये एषां वाच्यकत्वेऽस्ति कश्चित्स्वरूपस्य विशेषाय
श्चमत्कारकारी स एव व्यंजकत्वं प्राप्नोतीति। एवमन्येषामपि बोद्धव्या। वर्णस्वना व्यंजकत्वं गुण
स्वरूपनिरूपणे उदाहरिष्यते। अपिशब्दात्प्रबंधेषु नाटकादिषु। एवं रसादीनां पूर्वगणितभे
दाभ्यां सह षड्भेदाः। ध्वनिभेदास्तदेकपंचाशत्। व्याख्याताः। तेषां चान्योन्ययोजने। संकरेण त्रिरू
पेण संसृष्ट्या चैकरूपया। न केवलं शुद्धा एकैकपंचाशत्संदोपसर्वति यावत्तेषां स्वप्रभेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८॥ क्षणदाप्यगुणा कीदेव रजायया सुभग किमपि ते पाणितानशौ दिति पश्चाज्ज्ञाग वल्लभीगेहे अनुनी
यतां वराकी ॥३
रेक पंचाशाता। संज्ञायास्यदत्वेनानुग्राह्यानुग्राहकतयैकव्यंजकानुप्रवेशेनचेति त्रिविधेन सं
करणापरस्परमनिरपेक्षतयैकाकारयासंसृष्ट्याचेति चतुर्गुणेन न॥ वेदाब्धिवियच्चन्द्राः १०४०
४ शुद्धभेदैः सहाशरेषुयुगखेन्दवः ॥१०४५५ ॥ तत्र दिङ्मात्रमुदाह्रियते खणपाहुणिआ देअर
जाआए सुहअ किं पि दे सणिच्छो। रुअइ पडोहरवडहीघरम्मि अणुणिज्जउ वराई॥ अत्रानुनयः
किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः। किमनुरणनन्यायेनोपभोग एव व्यंग्यव्यंजक इति सं
देहः। स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृ
दामानन्दकेकाः कलाः। कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति ह
हा हा देवि धीरा भव॥ अत्र लिप्तेति पयोदसुहृदामिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां
सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यंजकानु
प्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योः संकरः। एवमन्यदप्युदाहार्यं॥ काव्यप्रकाशे ध्वनि
निर्णयश्चतुर्थोल्लासः समाप्तिमगमत्॥ ०००० अत्र रामपदं ससहिष्णुत्व विरलत्व ध्वन्योर्व्यंजके
लि तद्पदस्य व्यापनेल॰ व्यापनातिशयो व्यंग्यः स तु तद्पदस्य परितोषकारित्वेन॰ तद्पतिशयो व्यं॰ अत्र अत्यं
ततिरस्कृतवाच्ययोः संसृष्टिः ताभ्याम् अत्यन्त तिरस्कृतध्वनिभ्यां सह अर्थान्तरसंक्रमितवाच्यरसध्व
न्योः संकरः॥ रामपदस्य दुःखसहिष्णुत्वेन॰ तदतिशयो व्यंग्यः तेन विप्रलंभातिशयः परिपोष्यते
विप्रलंभध्वनिरनुग्राह्यः दुःखसाहि॰ अनुग्राहकः ६६

जीवन्निति अस्याश्लाघ्यजीविते लक्षणमनुतापातिशयो व्यंग्यः ५
॥ह॥ श्री॥ एवं ध्वनौ निर्णीते गुणीभूतव्यंग्यस्य प्रभेदानाह॥ अगूढमपरस्यांगं वाच्यसिद्ध्यंगम
स्फुटं॥ संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंदरं॥ व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदाः स्मृताः
कामिनीकुचकलशवत् गूढं चमत्करोति। अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतव्यंग
मेव। अगूढं यथा। यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ॥ का वा
गुणाग्रघनभाजन मेष सोऽस्मि जीवन्नसंप्रतिभवामि किमावहामि॥ अत्र जीवन्निति अर्थान्तरसंक्रमि
तवाच्यस्य॥ उन्निद्रकोकनदरेणुपिशंगितांगा गायंति मंजु मधुपा गृहदीर्घिकासु॥ एतच्चका
स्ति च रवेर्नवबंधुजीवपुष्पच्छदाभमुदयाचलचुंबिबिंबं॥ अत्र चुंबनस्यात्यंततिरस्कृतवाच्य
स्य॥ अत्रासीत्फणिपाशबंधनविधिः शक्त्या भवद्देवरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः
दिव्यैरिंद्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लंभितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कंठाट
वी॥ अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुस्वानरूपस्य। तस्याप्यत्रेति च युक्तः पाठः। अपरस्य रसादेर्वा
च्यस्य वा वाक्यार्थीभूतस्यांगं रसादि अनुरणनरूपं वा॥ अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥ अत्र शृंगारः करुणस्य॥ कैलासालयभाललोचन
रुचा निर्वर्तितालक्तकव्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायतां॥ स्पर्धाबंधसमृद्ध
अत्रांगभूतशृंगारस्यैव चमत्कारकारितात् प्राधान्यता॥२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽलंकारकाव्यस्थले रसादिध्वनिसत्वेपि शब्दानुप्रासाद्यलंकारस्यैव चमत्कारप्रयोजकत्वादलंकार

येवमुदाहरणदायपाने त्रयोः कीर्तिः कोकेन दानुकारस्सरसासद्यः समुत्सार्यते । अत्र स्त्रावस्परसः ॥

अत्युच्चाः परितः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि न क्लांतासि तुभ्यं

नमः ॥ आश्चर्येण मुहुर्मुहुस्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमांस्मृतस्तव भुजो वाचस्ततो मु

द्रिताः ॥ अत्र पराविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ॥ बंदीकृत्य नृपद्विषां मृगदृशस्ताः

पश्यतो प्रेयसां श्लिष्यंति प्रणयंति लांति परितश्चुंबंति ते सैनिकाः ॥ अस्माकं सुकृतैर्दृशोर्निपतितो

स्यौचित्यवारां निधे विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥ अत्र भावस्य रसाभासभा

वाभासौ प्रथमद्वितीयार्द्धद्योत्यौ ॥ अविरलकरवालकंपनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ॥ ददृशे तव वै

रिणां मदः स गतः क्वापि तवेक्षणोक्षणात् ॥ अत्र भावप्रशमः ॥ साकं कुरंगकदृशा मधुपानलीलां कर्तुं

सुहृद्भिरपि वैरिणि ते प्रयाते ॥ अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विषमामकरोदवस्थां ॥

अत्र भावस्योदयः ॥ असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विश्रंभेष्वथ च रसिकः शैलदुहि

तुः ॥ प्रमोदं वो दिश्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ अत्रावेगधै

र्ययोः संधिः ॥ पश्येत्कश्चिच्चल चपल रे का त्वरा हं कुमारी हस्तालंबं वितर हहहा व्युत्क्रमः क्वासि यासि ॥

इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या कंचित्फलकिसलयान्याददानाभिधत्ते ॥ अत्र शंका

असूयधृतिस्मृ ४

मध्यमकाव्ये अंतरालिकव्यंग्यभावादि रसादिपर्यंतिके व्यंग्ये तत्रांतरालिकव्यंग्यस्यैव चमत्का

रित्वे

रसस्यांगत्वे रसवदलंकारः भावस्यांगत्वे प्रेयस्विदलं॰ रसाभासभावाभासयोरंगत्वे ऊर्जस्विदलं॰ भावशांतेरंगत्वे स

सूयाधृतिस्मृतिश्रमदैन्यविवेकानां शबलता ॥ एते च रसवदाद्यलंकाराः ॥ यद्यपि भावोदयभा

वसंधिभावशबलत्वानि नालंकारतया क्वापि तथा च केचिदित्थमुक्तं ॥ यद्यपि स नास्ति कश्चि

द्विषयोऽयत्र ध्वनिगुणीभूतव्यंग्ययोः स्वप्रभेदादिभिः सह संकरः संसृष्टिर्वा नास्ति तथापि प्राधान्येन

व्यवहारा भवंतीति कश्चिदेकेन चिह्नेव व्यवहारः ॥ उन्नस्थानोभांति कनकमृगरूपो वितथधिया वचो वदे

हीति प्रतिपदमुदस्य प्रलपितं ॥ हृतालेकाभर्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलव

सुता न त्वधिगता ॥ अत्र शब्दशक्तिमूलोऽनुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां

नीतः ॥ आगत्य संप्रति वियोगविसंस्थुलांगीमंभोजिनीं क्वचिदपि क्षपितत्रियामः ॥ एतां प्रसादय

ति पश्य शनैः प्रभाते तन्वंगि पादपतनेन सहस्ररश्मिः ॥ अत्र नायकवृत्तांतोऽर्थशक्तिमूलोऽव

स्तुरूपो निरपेक्षरविकमलिनीवृत्तांताध्यारोपेणैवावस्थितः ॥ वाच्यसिद्ध्यंगं यथा ॥ भ्रमिमरति

मलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादं ॥ मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियो

गिनीनां ॥ अत्र हालाहलं व्यंग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृद्धयाख्यावा ॥ गच्छाम्यच्युत दर्शनेन

न भवतः किं जातिरूपस्त धते किंत्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ॥ इत्यामंत्रणभंगि

सूचितदर्पाव्यवस्थानखेदालसामाश्लिष्यन् पुलकोत्कराचिततनुर्गोपीं हरिः पातु वः ॥

इयं अंगं ५ अत्र रतिकमलिनीवृत्तांतस्य नायकनायिकावृत्तांतो अंगं ५

अत्र अच्युतादिव्यंग्यं आमंत्रणोत्यादिवाच्यस्यासिद्धिस्तत। एतच्चैकत्र एकवस्तुगतत्वे नैत्यनयोर्भे
दः॥ अस्फुटं यथा॥ अदृष्टदर्शनोत्कंठा दृष्टविच्छेदभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सु
खं॥ अत्रा दृष्टो यथा। न भवसि वियोगभयं च यथा नोत्पद्यते तथा कुर्या इति क्लिष्टं। संदिग्धप्राधान्यं
यथा॥ हरस्तु किंचित्परिवृत्तधैर्यश्चंद्रोदयारंभ इवांबुराशिः। उमामुखे बिंबफलाधरोष्ठे व्या
पारयामास विलोचनानि॥ अत्र परिचुंबितुमैच्छदिति किं प्रतीयमाने किं विलोचनव्यापारणे वा
वाच्ये प्रधानमिति संदेहः। तुल्यप्राधान्यं यथा। ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जाम
दग्न्यस्तथा मित्रमन्यथा दुर्मनायते॥ अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षणात् क्ष
यं करिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्राधान्यं। काक्वाक्षिप्तं यथा। मथ्नामि कौरवशतं समरे
न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः॥ संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भ
वतां नृपतिः पणेन॥ अत्र मथ्नाम्येवेत्यादि व्यंग्यं वाच्यनिषेधसहभावेन स्थितं। असुंदरं य
था॥ वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणंतीए। घरकम्मवावडाए बहूए सीअंति अंगाइं॥
अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यात् सीदंत्यंगानीति वाच्यं सचमत्कारं एषां
भेदा यथायोगं वेदितव्याश्च पूर्ववत्। यथायोगमिति। व्यज्यते वस्तुमात्रेण यदालंकृतयस्तदा॥
वानीरकुंजोड्डीनशकुनिकोलाहलं शृण्वत्याः। गृहकर्मव्यापृताया वध्वाः सीदंत्यंगानि॥ अत्र हेतोर्वाच्यपदार्थे

॥२०५

रस्परसापेक्षतया यत्रावस्थितिः तत्र संकरः परस्परनिरपेक्षतया यत्रावस्थितिस्तत्र संसृष्टिः यथा। अंतरालि केशपाश
ध्वंबंधनं गता तासां कावयवन्नेहसदाश्रयात्॥ इति ध्वनिकारोक्तदिशा वस्तुमात्रेणालं
कारो व्यज्यते। न तत्र गुणीभूतव्यंग्यत्वं। सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः॥
सालंकारैरिति। तैरेवालंकारैः अलंकारयुक्तैश्च तैः। तदुक्तं ध्वनिकृता॥ सगुणीभूतव्यंग्यैः
सालंकारैः सह प्रभेदैः स्वैः॥ संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा॥ अन्योन्ययोगादेव
स्यादेदसंख्यातिभूयसी॥ एवमनेन प्रकारेण अवांतरभेदप्रभेदगणनेति प्रस्तुततरागण
ना। तथाहि। शृंगारस्यैव भेदप्रभेदगणनायामानंत्यं का गणना सर्वेषां। संकलनेन पुन
रस्य ध्वनेस्त्रयो भेदा व्यंग्यस्य त्रिरूपत्वात्॥ तथाहि। किंचिद्वाच्यतां सहते किंचित्त्वन्यथा।
तत्र वाच्यतासहं। विचित्रमविचित्रं चेति। अविचित्रमिति वस्तुमात्रं। विचित्रमलंकाररूपं।
यद्यपि प्राधान्येन तदलंकार्यं तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसादिलक्षण
स्त्वर्थः स्वप्नेपि न वाच्यः। स हि रसादिशब्देन शृंगारादिशब्देन वाभिधीयेत। न चाभिधी
यते। तत्प्रयोगेपि विभावाद्यप्रयोगे रसस्याप्रतिपत्तेस्तदप्रयोगेपि विभावादिप्रयोगे प्रति
पत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयत इति निश्चीयते। तेनासौ
व्यंग्य एव। मुख्यार्थबाधाद्यभावात् न पुनर्लक्षणीयः। अर्थांतरसंक्रमितात्यंततिरस्कृतवाच्य
रसमवीमासेनादरूपं वस्तु अविचित्रं ६ अलंकाररूपं विचित्रं नाम चमत्कारकारि

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिहितानां पदानामन्वयं शक्तिं वदतीत्यभिहितान्वयवादिनस्तेषां मते घटमानयेत्यादिवाक्ये ।शब्दशक्तिनियंत्रणेन
क्यानर्गमसंसर्गस्यैवाभानात् वाक्यबहिर्भूतस्य व्यंग्यस्य भानं तु दूरतोपास्तं ४ १

योर्वस्त्वमात्रं व्यंग्यं विना लक्षणेव न भवतीति प्राक् प्रतिपादितं। शब्दशक्तिमूलत्वं नियंत्रणेन
अनभिधेयस्यार्थेतिरस्यते न सहोपमादेरलंकारस्य निर्विवादव्यंग्यत्वं। अर्थशक्तिमूलेपि वि
शेषसंकेतः कर्त्तुं न युज्यत इति सामान्यरूपाणां पदार्थानां आकांक्षासन्निधियोग्यतावशात् प
रस्परसंसर्गो यत्रापदार्थो विविशेषरूपो वाक्यार्थः तत्राभिहितान्वयवादे का वार्त्ता व्यंग्यस्या
भिधेयतायां। येप्याहुः शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति। श्रोतुश्च प्रतिपन्नत्वमनुमाने
न चेष्टया॥ अन्यथानुपपत्त्या तु बुद्धेः शक्तिं द्वयात्मिकां। अर्थापत्त्यैव बुध्यते संबंधं त्रिप्रमाण
कं। त्रिप्रमाणकमिति प्रतिपादितं द्विशो देवदत्त गामानय इत्युत्तमवृद्धवाक्यप्रयोगे देशाद् टीका २
शांतरं सास्नादिमंतमर्थं मध्यमवृद्धे नयति सति जनेनास्माद्वाक्यादेवं विधोर्थः प्रतिपन्न इति चेष्टा
मनुमाय तयोरखंडवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं संबंधं अवधार्य बा
लस्तत्र व्युत्पद्यते। परतः तश्चैत्र गामानय देवदत्ताश्वमानय देवदत्त गां नयेत्यादिवाक्यप्रयोगे
तस्य तस्य शब्दस्य तं तमर्थमवधारयतीत्यन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारि वाक्यमेव प्र
योगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव संकेतः गृह्यते। इति साकां
विशिष्टा एव पदार्था वाक्यार्थो न तु पदार्थानां वैशिष्ट्यं। यद्यपि वाक्यांतरप्रयुज्यमानान्यपि क्षाणां २

बोधि संबंध ग्रा — दृष्टं वाच्यमानं च कदृष्ट्वा प्रतिपोगनुपोगि स्वरूपेण यः पत्ताः एतादृश शक्तिग्राहिः २
वाच्यस्य वाचकपदे ज्ञानजन्यत्वे वाच्यवाचकभावसंबंधं विनानुपपन्न ८ अर्थापत्ता १
ति १

तद्वेदं गो — शब्दरूपशरणादिनिमित्तैर्नैमित्तिकप्रवृत्तिः एवं व्यंग्यरूपं निमित्तं विनिश्चितं नैमित्तिक ... प्रतीति प्रसंग
पदे १ — भूतरान्विते शक्तिः ... मानयेना न्वित ... शक्तिस्तत्प

प्रत्यभिज्ञाप्रत्ययेन तान्येवेतानि निश्चीयंत इति॥ पदार्थांतरमात्रेणान्वितः पदार्थः संकेत
गोचरस्तथापि सामान्यावस्थादितो विशेषरूप एवासौ पदार्थः प्रतिपद्यते। व्यतिषक्तानां
पदार्थानां तथाभूतत्वात्। इति अन्विताभिधानवादिनां ते मामपि मते सामान्यविशेषरू
संसर्गः पः पदार्थः संकेतविषय इत्यतिविशेषभूतो वाक्यार्थांतरगतो संकेतितत्वाद्वाच्य एव यत्र प
दार्थः प्रतिपद्यते। तत्र दूरेऽर्थांतरभूतस्य निःशेषच्युतेत्यादौ विध्यादेश्चर्चा। अनन्वितोर्थो
अभिहितान्वये। पदार्थांतरमात्रेणान्वित ... स्त्वन्विताभिधाने अन्वितविशेषस्त्ववाच्य ए
वेत्युभयनयेपि अपदार्थ एव वाक्यार्थः॥ यदप्युच्यते नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यंत इति
जनक — तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा। शब्दस्य प्रकाशकत्वात् न कारकत्वं। ज्ञापकत्वं चेत् ज्ञातस्यैव
ज्ञात्यैव — ज्ञापकत्वं ज्ञातत्वं संकेतेनैव स चान्वितमात्रे। एवं निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नै
मित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यंत इति अविचाभिताभि
धानां। यत्तु भिद्यत इति सोयमिषोरिव दीर्घदीर्घतरो व्यापार इति यत्परः शब्दः स शब्दार्थ इति च विधि
रेव च निःशेषच्युतेत्यादौ वाच्य इति तेषां तात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानांप्रियाः। तथाहि भू
सिद्ध २ — तभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते इति कारकपदार्थाः क्रियापदार्थैरन्वीयमानाः प्रधा
भि १ — नक्रियायां निर्वर्तकस्य क्रियासिद्धत्वात् साध्यायमानतां प्राप्नुवंति। ततश्चादग्धदहनन्यायेन याव

स्वाभिगतासीति विधिः नरें तु मितिनिषेधः ३   शब्दतात्पर्यं च ४ प्रभावः ३
साध्याय उपयुज्यते २ पदार्थसिद्धो द्रव्यः ... न यत्नेन नित्यं विशिष्टसाध्यायमान
ता प्राप्नोति १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व नि ग्राह्यः त्याज्यान भ ४

अज्ञातज्ञापनं विधिः । तत्र शब्दस्य विधेयो योनार्थस्य प्रमाणं कथं चेत् प्रसक्ते यागः सिद्धे ऋत्विक्प्रचरणमुद्दिश्य

॥२२॥ दध्यादीनां विधीयते । यथा । ऋत्विक्प्रचरणे प्रमाणान्तरासिद्धे लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यत्र लोहितोष्णीषमात्रं विधेयो हवनस्यान्यतः सिद्धे दध्ना जुहोतीत्यादौ दध्नः करणत्वमात्रं विधेयो कुचिदुभयविधिः । क्वचित्त्रिविधिरपि यथा रक्तं पटं वयेत्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा तत्र च यद्यदविधेयं तत्त्रैव तात्पर्यमिति पौरुषेये वचने शब्दस्यार्थो तात्पर्यमनुप्रतीतिमात्रे एवं पूर्वोपाधावतीत्यादौ यपराधार्थे पिकाचिन्ता तात्पर्यं स्यात् । यत्तु विषभक्षणमात्रस्य गृहे भुंक्ष्वा इत्यचेतनपदे दंष्टहननमो वाक्यामित्यत्र तात्पर्यमिति सर्वस्वाध्याय इति उच्यते । तत्र च कारणं कुवाक्यतासम्बन्धार्थः । न चास्त्याख्या तत्र वाक्यार्थयोर्द्वयोरंगांगिभावं ... विषभक्षणवाक्यस्य सुहृद्वाक्यत्वेनांगताकल्पनीया इति विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्वथा मा स्य गृहे भुंक्ष्वा इत्युपात्तशब्दस्यैव तात्पर्यं । यदि च शब्दश्रुतेरनन्तरं यावानर्थोऽवगम्यते तावति शब्दस्याभिधेयव्यापारस्तत्कथं ब्राह्मणपुत्रस्ते जातो ब्राह्मणकन्या ते गर्भिणीत्यादौ हर्षशोकादीनामपि न वाच्यत्वं कस्माच्च लक्षणा । लक्षणीयप्यपदीर्घो दीर्घोऽभिधाव्यापार एवं प्रतीतिसिद्धेः । किमिति च श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां पूर्वपूर्वबलीयस्त्वं । इत्यन्वितानाभिधानवादेपि विधेयपि सिद्धं वाच्यं । किंच । कुरुरुचिमितिपदयोर्विपरीतेकाव्यान्तर्वर्त्तिनि कथं दुष्टत्वं न ह्यत्रासभ्यार्थः पदार्थान्तरेणान्वितप्रत्यभिधेय एवं कस्य वमादिन्नपरित्याज्यं स्यात् । यदि च वाच्यवाचकव्यतिरेकेणार्थ

॥२२॥

एकधर्मावच्छिन्नव्याप्यं वाच्यं यथा घटत्वमनेकघटेषु [illegible] नैकधर्मावच्छिन्नव्याप्यं व्यंग्यं यथा गतोऽस्तमर्क इत्यादौ तथा च व्यंग्यार्थस्य व्यंजकाभावो नाभ्युपेयते । तदोऽसौ ... त्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकारणमनुपपन्नं स्यात् । न चानुपपन्नं सर्वस्यैव विभक्ततया प्रतिभासात् । वाच्यवाचकभावातिरेकेण व्यंग्यव्यंजकताश्रयणेन तु व्यंग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एवेयं विभागव्यवस्था । ह्रयगते संप्रतिज्ञोचनीयतां समागमप्रार्थनया कपालिनः इत्यादौ पिनाकित्यादिपदवैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वं । अपि च । वाच्योर्थः सर्वान्प्रतिपत्तॄन् प्रत्येकरूप एवेति नियतोसौ । न हि गतोऽस्तमर्क इत्यादौ वाच्योर्थः क्वचिदन्यथा भवति । प्रतीयमानव्यंग्यस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते । तथा च गतोस्तमर्क इत्यतः संपन्नं प्रत्यवस्कंदनावसर इति । अभिसरणमुपक्रम्यतामिति । प्राप्तप्रायस्ते प्रेयानिति कर्मकरणान्निवर्त्तामह इति । सांध्यो विधिरुपक्रम्यतामिति । दूरं मा गा इति सुरभयो गृहप्रवेश्यंतामिति संतापोऽधुना न भवतीति विक्रेयवस्तु निसंक्षिप्यतामिति नागतोऽद्य प्रेयानित्यादिरनवधिर्व्यंग्योऽर्थस्तत्र तत्र प्रतिभाति वाच्यव्यंग्ययोर्निःशेषच्युतेत्यादौ निषेधविध्यात्मनोर्मात्सर्यमुत्साये विचार्यकार्यमार्याः समर्यादमुदाहरन्तु । सेव्या नितंबाः किमु भूधराणामुत स्मरस्मेरविलासिनीनां । इत्यादौ संशयशान्तरूपे गायन्यतरमतनिश्चयरूपेण । कथमेवं निषेधपर्यवसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽंगनायां सह्वार्थशब्दैकदेशरचनावर्णश्च पदोनाश्च यमदाडेदः प्रतीयते ३ नात्मकज्ञातिजन्य शा
निदास्तद्योरनुक्रमाद्वाच्यव्यपदेश २ ननु ... ज्ञानेन ३
सेध ... नार्थके ४

शाता सिधारा दल्लनगलितमध्वं विद्विषां स्वीकृताश्री॥ ननु तव निहतारे रघ्य सो किं न नीता त्रिदि
वमुपगतां गैर्वल्लुसाकीर्णरभिः॥ इत्यादौ निर्दोस्त्कृतिवपुषा स्वरूपस्य पर्वपक्ष्याद्भावनप्रतीतेः काल
स्य। शाशृभि यत्वनशाब्दैकदेशतदर्थवर्णसंघटनाश्रयत्वं तन्त्राश्रयस्य। शाब्दार्थेशासनज्ञानेन
प्रकरणसहायप्रतिभानैर्मल्यसहितेन तत्त्वावगम इति निमित्तस्य बोधमात्रविदग्धव्यपदेश
योः प्रतीतिमात्रं च महत्त्वयोश्चकस्मात्कार्यस्य। गतोस्तमर्क इत्यादौ प्रदर्शितनये संख्यापाः। एवा के
स्मपणेलाइरोसोदन्नणपिआइस्सु णाञ्चहर। सस्स मरपउमग्घा आरिवारि अवामेसहसुइत्ति॥ इत्या
दौ सखी नतांतोदिगतत्त्वन विषयस्य च भेदे विपर्यये कत्वं तत्र कचिदपि नीलरीत्यादौ पदो न स्यात्
उक्तेहि। अयमबालिसदोमे देहलुवी यद्विरुद्धधर्माध्यासः कारणभेदश्चेति। [redacted] वाच्यकाना
मप्यपि साव्यंजकानां लतदनपदत्वमपि तिन वाच्यकत्वमेव व्यंजकत्वं। किंच। वाणीरकुडंगे सा
दौ तृतीयमानमर्थमभिव्यञ्जय वाच्यस्वरूप एव यत्र विश्राम्यति तत्र गुणीभूतव्यंग्ये तो तत्प्रकृतो
प्यर्थः स्वचाश्रुतानभिव्यञ्जयः प्रतीतिपथमवतरन्नकस्य व्यापारस्य विषयतामवलम्बतां। ननु रामोस्मिन्
सर्वसहे इति रामेण प्रियजीवितेन चकृतं प्रेम्णः प्रियानोचितमिति रामो सोप्यनुवने पुष्टिक्रमगुणैः प्र
मः प्रसिद्धिपरामित्यादौ लक्षणायो थोनानात्वं भजते विशेषव्यपदेशाहेतुश्चास्ततितदवगमश्च

संकेतपरंगरूणे ४ ... ४ ... ४
नीलतलपीनत्वादिः ...

ध्वनौ ४ सेधुवप ... २ शब्दसंबंध मुख्यार्थबाधप्रयो समाधान

शाब्दार्थो यत्त प्रकरणादिसव्यपेक्षश्चेतिको यन्तु तेनैः प्रतीयमानानामर्थोच्यते। लक्षणीयस्यार्थस्य
नानात्वे अनेकार्थशब्दाभिधेयवन्नियतत्वमेव ननु खलु मुख्येनार्थेनानियतसंबंधो लक्षयितुं शक्य
ते। प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसंबंधः अनियतसंबंधः संबद्धसंबंधश्च द्योत्य
ते। नवा रे हरिणि मस्तुइए अहं दिग्रसयं पुलोएसु। मोपहि अरत्ति ... मंडणं माड्डि
हासि। इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधस्तत्कथं लक्षणा लक्षणीयस्यार्थस्य व्यंज
नेनापि व्यपदेशाश्रयितव्यमिति प्रतिपादितं। यथा च समयसव्यपेक्षा अभिधा तथा मुख्यार्थबाधादि
त्रयसमयविशेषसव्यपेक्षा लक्षणा। अत एवाभिधापुच्छभूता सा इत्याहुः। न च लक्षणात्मकमेव
ध्वननं तदनुगमेन तस्य दर्शनात्। न च तदनुगतमेव अभिधावलम्बनेनापि तस्य भावात्।
न चोभयानुसार्येव। अवाचकवर्णानुसारेणापि तस्य दृष्टेर्न च शब्दानुसार्येव अशब्दात्मकनेत्र
विभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेः॥ इत्यभिधातात्पर्यलक्षणात्मकव्यापारत्रया
तिवृत्तो ध्वननादिपर्यायो व्यापारो ऽनपह्नवनीय एव। तत्र च। अस्ताएहे यादौ नियतसंबंधः। क
स्स व णहोइरोसो इत्यादावनियतसंबंधः। विवरीयरए लच्छी बंभं दट्ठूण णाहिकमलत्थं। हरिणो
दाहिणणयणं रसाउला झत्ति ढक्केइ॥ इत्यादौ संबद्धसंबंधः। अत्र हि हरिपदेन दक्षिणनयनस्य
सूर्यात्मता व्यज्यते। तन्निमीलनेन सूर्यास्तमयः। तेन पद्मस्य संकोचस्ततो पि ब्रह्मणः स्थगनं तत्र
सति हावलोकनस्यापेनेवावरिवेचनं प्रबंधमुकसंबद्धये तद्विना मध्ये लक्षणादि निरूपणे आसंबंधविवेचनेन
ध्वननं नव्याप्तिः इति व्यञ्जनापरमार्थः॥

२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ निःशेषच्युत: ३ — संसर्गानवगाहिबुद्धिविषयः १

सति — गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्वात् अन्यप्रदेशवत् — कु २

गोप्यांगस्पर्शो दर्शने तिर्यग्गुणो निधुवनविलसिते। अखंडबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यो वा
वाक्यमेव वाचकमिति येप्याहुस्तैरप्यविद्यापदपतितैः पदार्थकल्पना कर्त्तव्येति तत्पक्षेप्यवश्यमु
क्तोदाहरणादौ विध्यादिर्व्यंग्य एव। ननु वाच्यादसंबद्धस्तावन्न प्रतीयते। यतः कुतश्चिद्यस्य कस्यचिद
र्थस्य प्रतीतेः प्रसंगात्। एवं च संबंधात् व्यंग्यव्यंजकभावोऽप्रतिबंधे व्यवश्यं न भवतीति व्याप्यत्वेनाभि
मतधर्मिनिष्ठत्वेन च त्रिरूपात् लिंगात् लिंगिज्ञानमनुमानं यत्तद्रूपः पर्यवस्यति। तथाहि। भमधम्मि
अवीसत्थो सो सुणउ अज्ज मारिओ तेण। गोलाणइकच्छकुडंगवासिणा दरियसीहेण॥ अत्र गृ
हे श्वनिवृत्या भ्रमणं विहितं। गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति। यद्यद्भीरुभ्र
मणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकं। गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपल
ब्धिः। अत्रोच्यते। भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वान्येन चैवंभूतेन हेतुना सत्यपि भय
कारणे भ्रमतीति अनैकांतिको हेतुः। शुनो बिभ्यदपि धीरत्वेन सिंहान्न बिभेतीति विरुद्धोपि। गोदाव
रीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः। अपि तु वचनात्। न च वचनस्य प्रामाण्यमस्त्यर्थेना
प्रतिबंधादिति असिद्धश्चेति तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः। तथा निःशेषच्युतेत्यादौ गमकतया या
नि चंदनच्यवनादीन्युपात्तानि तानि कारणांतरतोपि भवंतीति अत्रैव स्नानकार्यत्वेनोक्तानीति
नोपभोगैककार्यत्वेन प्रबद्धानीति अनैकांतिकानि। व्यक्तिवादिना चाधमपदसहायानामेषां व्यंजकत्वमुक्तं।
स्पष्टा वात ३

हेतुर्निश्चयानपक्ष अतः संदिग्धासिद्धः ३ ४ इयं जा धमेन भुक्ता चंदनच्यवनादिमत्त्वात्
व्याप्तिपक्षधर्मतानिश्चयपक्षत्वात् ३ ॥२४॥ते २

एतद्देशनधीरत्वं विपक्षेनुमुच्यते शब्दजन्यसाक्षात्कारविषयत्वे व्यर्थविशेषणत्वमनेकविषयत्वं
योगे परत्वयोग्यत्वाभिनेयविशेषणत्वं न स्वर्गे तथा रसे ह्यात्र भ्रमोत्पादकमालिंगितानि ४१ व्याप्यधनेपक्षिलेपि ४
न चात्र एतत्प्रमाणप्रतिपन्नमिति कथमनुमानं। एवंविधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वे नैवं
प्रकाशत इति व्यक्तिवादिनः पुनरदूषणं॥ ६२॥ इति काव्यप्रकाशे ध्वनिगुणीभूतव्यंग्यसंकी
र्णभेदनिर्णयो नाम पंचमोल्लासः समाप्तिमगमत्॥ ७७ ६६ ४८ ८॥१००॥ शब्दार्थचित्रं यत्पूर्वं
काव्यद्वयमुदाहृतं। गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः॥ न तु शब्दचित्रेऽर्थस्याचित्रत्वमर्थ
चित्रे वा शब्दस्य तथा चोक्तं॥ रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः। न कांतमपि निर्भूषं विभा
ति वनिताननं॥ रूपकादिरलंकारबाह्यमाचक्षते परे। सुपां तिङां च व्युत्पत्तिं वाचां वांछंत्यलंकृतिं।
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी। शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः। इति। शब्दचि
त्रं यथा। प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः। उ
दयति ततो ध्वांतध्वंसक्षमः क्षणदामुखे सरसबिसिनीकंदच्छेदच्छविर्मृगलांछनः॥ अर्थचित्रं
यथा। ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च। नीचाः सदै
व सविलासमलीकलग्ना ये कालतां कुटिलतामपि न त्यजंति॥ यद्यपि सर्वत्र काव्येऽतंतो विभा
वादिरूपतया रसपर्यवसानं तथापि स्फुटस्य रसस्यानुपलंभादव्यंग्यमेतत्काव्यद्वयमुक्तं। अत्र
च शब्दार्थालंकारभेदाद्बहवो भेदास्ते चालंकारनिर्णये निर्णेष्यंते। इति काव्यप्रकाशे चित्रकाव्यनिरूपणं नाम ष
ष्ठोल्लासः समाप्तिमगमत्॥ ६॥ काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह। मुख्या
भलकरसगसा २ — र्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

विशेषो लक्ष्यतेऽनेनेति विशेषलक्षणो यो ऽत्र तद्धर्मा वाक्ये न व्याख्यातो ऽत्र दोषो हेयो वा वाक्यार्थदोषभेदेन वाक्यार्थबोधाह
प्रतीयमानो दोषः स वाच्यः तदुत्र प्रतीयमानः स अर्थदोषः पदसमुदायो वाक्यमिति अत्राथ प्रथमं पददोषानाह दुष्टं ।
॥२५॥ उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ॥ हतिरपकर्षः ॥ आद्याद्यग्रहणाद्वर्णरचने । विशे
षलक्षणमाह । दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम् । निहतार्थमनुचितार्थं निर
र्थकमवाचकं त्रिधाश्लीलम् ॥ संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ॥ अविमृष्टविधेयां
शं विरुद्धमतिकृत् समासगतमेव ॥ श्रुतिकटु परुषवर्णमयं दुष्टं यथा । अनङ्गमङ्गलगृ
हापाङ्गभङ्गितरङ्गितैः ॥ आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥ अत्र कार्तार्थ्यमिति । च्यु
तसंस्कृति व्याकरणहीनं यथा । एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुरप्रान्तं हन्त पुलिन्द
सुन्दरकरस्पर्शक्षमं लक्ष्यते । तत्पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थनादीनं त्वामनुनाथ
ते कुचयुगं पत्रावृतं मा कृथाः ॥ अत्रानुनाथत इति याचनार्थे नाथ इत्यादावाशिष्येव नाथतेरा
त्मनेपदं नियमितमाशिषि नाथ इति । अत्र तु याचनार्थत्वात्तस्मान्नाथतीति स्तनाविति पठनीयम् । अप्र
युक्तं यथा । तथाम्नातमपि कविभिर्नादृतम् । यथा । यथायं दारुणाचारः सर्वदैव विभाव्यते ।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा ॥ अत्र दैवतशब्दो दैवतानि पुंसि वेत्याम्नातोऽपि न केन
चित्प्रयुज्यते ॥ असमर्थं यदर्थपठ्यते न च तत्र तस्य शक्तिः ॥ यथा । तीर्थान्तरेषु स्नानेन स
मुपार्जितसत्कृतिः ॥ सुरस्रोतस्विनीमेष हन्ति संप्रति सादरः ॥ अत्र हन्तीति गमनार्थे । निहतार्थं
यदुभयार्थमप्रसिद्धार्थे प्रयुक्तं यथा । यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ॥२५॥

मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा ॥ अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृ
तरूपोऽर्थो व्यवधीयते । अनुचितार्थं यथा । तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या । यागिभिः
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥ अत्र पशुपदं कातरताभिव्यञ्जकत्वादनु
चितार्थम् ॥ निरर्थकं पादपूरणमात्रप्रयोजनं चादि । यथा । उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥ अत्र हिशब्दः ॥ अवाचकं यथा । अवन्ध्यकोपस्य विहन्तु
रापदो भवन्ति वश्याः स्वयमेव देहिनः ॥ अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ अत्र
जन्तुपदमदातर्यर्थे विवक्षितं न च तत्राभिधायकम् । यथा वा । हा धिक् सा किल तामसी शशिमुखी दृष्टा म
या यत्र सा तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम् ॥ किं कुर्मः कुशले सदैव विधुरो धाता न चेत्तत्क
थं तादृग्यामवतीमयो भवति मे नो जीवलोकोऽधुना ॥ अत्र दिनमिति प्रकाशमयमित्यर्थेऽवाच
कम् । यच्चोपसर्गसंसर्गादर्थान्तरगतम् ॥ यथा । जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ॥ भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलाव
ण्यवापीसंभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥ अत्र दधदित्यर्थे विदधदिति । त्रि
धेति व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात् । यथा । साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते । तस्य
धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम् ॥ लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः कश्चि
न्तु धारयोऽत्रापि धारणं च विशिष्टभावः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥ मिथ्याज्ञानजन्यसंस्कारविशेषः ३

त्केसरस्त्रितेक्षणाइ वक्ष्यामीत्यनेनात्रस्थितः॥ मुग्धाकुड्मलिताननेदधतीवायुं स्थितातस्यसा
भ्रांत्याधूर्त्ततयाधवानितिम्लतेतेनानिशंचुंबिता॥ मृदुपवनविभिन्नोमत्प्रियायाविनाशाद्घन
रुचिरकलापोनिःसपत्नोद्यजातः। रतिविगलितबंधेकेशपाशेप्रियायाःसतिकुसुमसनाथेकंहरे
देषबर्ही॥ एषुसाधनवायुविनाशात्राशंशः श्लीडाद्यभिव्यंजकाः॥ संदिग्धंयथा॥ आलिंगितस्तत्र भवानूसंपरायेजयश्रिया॥ आशीःपरंपरीविंध्येकण्ठितात्कपीकुरु॥ अत्रवैधात्कंठग्रहीतिमहि
लायांकिंनमस्याभितिसंदेहः॥ अप्रतीतंयत्केवलेशास्त्रप्रसिद्धं यथा॥ सम्यक्ज्ञानमहाज्योतिर्द
लिताशयतानुषः॥ विधीयमानमप्यत्रभवत्कर्मबंधने॥ अत्रआशयशब्दोवासनापर्यायोमो
गशास्त्रादेवप्रयुक्तः॥ ग्राम्यंकेवललोकेस्थितं॥ यथा॥ राकाविभावरीकांतसंक्रांतद्युति
तेमुखं॥ तपनीयशिलाशोभाकटिश्चहरतेमनः॥ अत्रकटिरितिग्राम्यं॥ नेयार्थंकृच्छ्रेणैवलक्ष
कितइतियन्निषिद्धंलाक्षणिकं॥ यथा॥ शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियं॥ करोतितेमु
खंतन्विचपेटापातनातिथिः॥ अत्रचपेटापातनेनेतिनिर्जितत्वंलक्ष्यते॥ अथसमासगतमेव
दुष्टमितिसंबंधः॥ अन्यत्तुकेवलेसमासगतंचक्लिष्टंयतोर्थप्रतिपत्तिर्व्यवहिता। अत्रिलो
लोचनसंभूतज्योतिरुद्गमभासिभिः॥ सदृशंशोभतेत्यर्थंभूपालतववेष्टितं॥ अत्रात्रिलो
चनसंभूतज्योतिरुद्गमनेनभासिभिः कुमुदैरित्यर्थः॥
श्रुतिकटुत्वादिसमासगतमसमासगतेच ३

क्लिष्टं अविमृष्ट विधेयांशं विरुद्ध मतिकृत् ... पदांशैतत्समासगतमेव तु ॥

मेदोकृ तात्सं ५

अविमृष्टविधेयांशविरुद्धमतिकृत्

अथ असज्ज्यप्रतिषेधरूपविधेयांशस्याप्रधानात्विधेयावमर्शोदोषः यथा॥ भूतले घटवन्नेति असज्ज्यप्रतिषेधः ४
ईश्वरसमुदायविषयत्व ३ कार्यं नैवसमासमाश्रियात् ८ अन्ययुदितयत्नलक्षणविधीमतेः ८
अविमृष्टविधेयांशो। प्राधान्येनाविमृष्टो विधेयोंशोयत्रतद्यथा॥ मूर्ध्निमुद्वृत्तकृत्ताविरलग
लगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसीदापनतजयजगज्जातमिथ्यामहिम्नः॥ कैलासोल्ला
सनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणांदोष्णांचैषांकिमेतत्फलमिहनगरीरक्षणेयत्प्रया
सः॥ अत्रमिथ्यामहिमत्वंनानुवाद्यं। अपितुविधेयं। यथाचा स्वस्ताणिनितंबात्पवलंबमानो
पुनःपुनःकेसरदामकांचीं॥ न्यासीकृतांस्थाननिविदास्मरणाद्वितीयमौर्वीमिवकार्मुकस्य॥ अत्र
मौर्वीद्वितीयामितिद्वितीयात्वमात्रमुत्प्रेक्ष्यं। यथाचावपुर्विरूपाक्षमलक्ष्यजन्मता [illegible] दिगंबरत्वे
ननिवेदितंवसु। वरेषुयद्बालमृगाक्षिमृग्यतेतदस्तिकिंव्यस्तमपित्रिलोचने॥ अत्रालक्षिता
जनिरितिवाच्यं। यथाच। आनंदसिंधुरतिचापलशालिचित्तसंदाननैकसदनंक्षणमप्यमु
क्ता॥ यासर्वदैवभवतातदुदंतचिंतातांतिंतनोतितवसंप्रतिधिग्धिगस्मान्॥ अत्रनमुक्तेतिनिषे
धोविधेयः। यथा॥ नवजलधरःसन्नद्धोयंनदृप्तनिशाचरःसुरधनुरिदंदूराकृष्टंनतस्यशरास
नं॥ अयमपिपटुर्धारासारोनबाणपरंपराकनकनिकषस्निग्धाविद्युत्प्रियानममोर्वशी॥ अत्र
इत्यत्रनत्वमुक्तंतानुवादेनान्यत्किंचिद्विहितं। यथा। जुगोपात्मानमत्रस्तोभेजेधर्ममनातुरः। अगृ
धुराददेसोर्थानसक्तःसुखमन्वभूत्॥ अत्रात्रस्तत्वाद्यनुवादेनात्मगोपनादिविरुद्धमतिकृत्
यथा। सुधाकरकराकारविशारदविचेष्टितः॥ अकार्यमित्रमेकोसौतस्यकिंवर्णयामहे॥ अत्रका
नदज्ञानेनाचरेत्सकृत्पदं ५

६.४

यो अकार्यमित्रः सकार्यमित्रमित्यत्र [illegible] रसास्ताह १

कुकर्म सु १

यं विना मित्रमिति विवक्षितं अकार्येषु मित्रमिति तु प्रतीतिः ॥ यथा वा चिरकालपरिस्यक्तलोचना
नंददायिनः ॥ कान्ताकान्तस्य सह सा विदध्याति गलग्रहे ॥ अत्र कंठग्रहमिति वाच्ये तथा न रोगविशे प: २
त्रस्ते यदि नाम भूतकरुणासंतानसांतात्मनस्तेन व्याकुंजता वनभूर्भगवतो देवाङ्गवानीपतेः
तत्पुत्रस्कंभप्रोधतारकवधाद्विश्वस्य दत्तोत्सवे स्कंदस्कंद इव प्रियोहमथवा शिष्यः कथं विस्मृ
तः ॥ अत्र भवानीपतिशब्दो भवान्याः पत्यंतरप्रतीतिं करोति ॥ यथा वा ॥ गौरीपयदाहनतात्रा
त्रवतः सोपि गिरिसुतासिंहः ॥ सविधे निरहंकारः पायाद्वः सौ विकारमणः ॥ अत्र विकारम
ण इति विरुद्धां धियमुत्पादयति ॥ क्लिष्टं दुःसमासगतत्वं यथा ॥ सादरस्त्वसुधासांद्रतरंगित
विलोचना ॥ बर्हि निर्मोकनाहीं कालस्य समुपागतः ॥ एवमन्यदपि ज्ञेयं ॥ अपास्य च्यु
तसंस्कारमसमर्थं निरर्थकं ॥ वाक्येपि दोषाः संत्येते पदस्यांशेपि केचन ॥ केचनेन पुनःस्त
वे ॥ क्रमेणोदाहरणानि ॥ श्रुतिकटु [illegible] समसंस्त
बंधनं ॥ व्याजेषषदुर्गभरस्तनीतो सम्मुलघा [illegible] न्यवधीदरीश्वं ॥ अप्रयुक्तं ॥ सरा तु दैवा दुर्गा [illegible]
नाभावुकानां परंपरा ॥ अनडुमृकताद्विश्वघातुदृषारस्संमतान्न ॥ अत्र दुश्च्यवन इंद्रः अने
डमूकोमूकबधिरः ॥ निहतार्थं ॥ साम्यकसहायबाहोमकरध्वज नियमितक्षमाधिपतेः ॥ अ

[illegible]

अभ्रपरस्य मेघत्वात् [illegible] न्येन जलदविशिष्टैष्यायातितथान्वविशेषणाभावप्रयु
क्तविरुद्धमस्व रस्ते भाति नरामवनि पुष्टलोकः ॥ अत्र सायकादयः शब्दाः खड्गचंद्रपर्यायाः
शराद्यर्थे तया प्रसिद्धाः ॥ अनुचितार्थं ॥ कुविंदस्त्वं तावत्पटयसि गुणग्राममभितो यशो गायंत्य
ते दिशि दिशि च नग्नास्तव विभो ॥ शरज्ज्योत्स्नागौरस्फुटविकटसर्वांगसुभगा तथापि त्वत्कीर्ति
भ्रमति विगताच्छादनमिह ॥ अत्र कुविंदादिशब्दो ऽर्थांतरं प्रतिपादयन्नुपश्लोक्यमानस्य ति
रस्कारव्यंजकत्वेनानुचितार्थः ॥ अवाचकं ॥ प्राप्य [illegible] विषमाश्वः करोत्ययं ॥ नि
द्रासहस्वपर्णोनां पलायनपरायणां ॥ अत्र प्राप्य विभुधाम विषमाश्व निद्रापर्णशब्दाः प्रकृष्ट
जलदगगनसप्ताश्वसंकोचपत्राणामवाचकाः ॥ त्रेधाश्लीलं ॥ नृपतेरूपसर्पंती कंपने वामलो सेना
चना ॥ तत्त्वहरणोत्साहवतीमोहनमाध्यो ॥ अत्रापि सर्पणप्रहरणमोहनशब्दा व्रीडादायिता
दश्लीलाः ॥ ते न्यूर्बेति सम्भ्रीति परोसर्गं विधरुजते ॥ इतरार्थग्रहे यत्पीकवीनामस्यात्प्रवर्त्तने ॥ अत्र
वांतोत्सर्गप्रवर्त्तनशब्दा जुगुप्सादायिनः ॥ पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे ॥
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकं ॥ अत्र पितृवसतिमित्यादौ विवक्षितश्मशाना
दिप्रतीतावमंगलार्थत्वं ॥ संदिग्धं ॥ सुरालयोल्लासपरः प्राप्तपर्याप्तकंपनः ॥ मार्गणप्रवणो भास्व
द्भूतिरेष विलोक्यतां ॥ अत्र सुरादिशब्दाः किं देवसेनागारमद्यार्थाः किं मदिराद्यर्थाः इति संदेहः ॥ अ
प्रतीतं ॥ तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ॥ दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः सखे ॥ [illegible]

[illegible]

स्मृत्याद्यः मध्योपायः अधिमात्रोपायः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीत्रोपपादय: [illegible] भ:३

यौ चाधिमात्रोपादय: आलापो गमस्तु मत्र प्रयुक्त्वाद प्रतीता: । ग्राम्यो । तांबूलभृतगल्लोयं सल्लुंज
ल्पति मानुष: ॥ करोति खादनं पानेस प्ल्वेतु यथा तथा ॥ अत्र भल्लुादय: शब्दा ग्राम्या: ॥ नेयार्थो । वरव
परा इवैडूर्यचरणै: क्षतसत्वरजस्तमा ॥ निष्कंपप स्मितान त्रयुग्म बोधयसां प्रतम ॥ अत्रोबर रत्नपाद
निहततमा: अत्र लाभ: कृता नत्र द्वंद्व बोधयति नेयार्थता ॥ क्लिष्टं ॥ धमिल्लस्य न कस्य प्रेक्ष्य निक्र
मेकुरंगशावाक्ष्या: ॥ रज्यत्यत्र व बंधयुक्त मनि संशोभा ॥ अत्र धमिल्लस्य शोभां प्रेक्ष्यमानसं
नरज्यती ति संबंधे क्लिष्टत्वं ॥ न्यक्कारो ह्ययमेव यदरयस्तत्राप्यसौ तापस: सोप्यत्रैव निहंति राक्ष
सकुलं जीवत्यहो रावण: ॥ धिक् धिक् शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्गग्रामटिका
विलुंठनवृथोच्छूनै: किमेभिर्भुजै: ॥ अत्रायमेव न्यक्कार इतिवाच्ये उच्छूनत्वमात्रमनुवाद्यन वृथात्व
मिति विरोधितं । अत्र चाद्यरचनाविपरीताहतेति वाक्यस्यैव दोषो न वाक्यार्थस्य यथावा । अपांगिसे
स्मर्गितरंगितं दृशो भ्रूचेरा कांतविलासवेल्लनं ॥ विसारि रोमांचनकंचुकं तनोस्तनोति योसौ सु
भगत्वागत: ॥ अत्र योसाविति पदद्वय [illegible] मनुवाद्यविधेय [illegible] र्थतया विवक्षितमत्र द्यमात्र प्र
तीतिकृत । तथा हि । प्रक्रांत प्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादाननापेक्षते । क्रमेणोदा
हरणानि । कातर्ये केवलानीति: नीत्ये अथापदत्वेर्थितं ॥ अत: सिद्धिं समेताभ्यामुभाभ्याम
न्विय: स: ॥ द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिन: ॥ कलाच सा कांति

[illegible]

[illegible]

K K S U LIBRARY
RAMTEK
441 106
M 1356
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:35
,TRANSFERRED=2020/10/23 at 15:39:43
,PAGES=30
,TYPE=STD
,NAME=S0004500
,Book Name=M-1356-KAVYAPRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection